# DHARMA

“Whenever I look around me, in the vast region of Hindoo Mythology, I discover piety in the garb of allegory: and I see Morality, at every turn, blended with every tale; and, as far as I can rely on my own judgment, it appears the most complete and ample system of Moral Allegory that the world has ever produced.” (Charles Stuart, Irish-born British Army General in India, 1758-1828)

“If the attainment of the middle path consisted in a mere surrender to instinct, as the bewailers of ‘naturalism’ suppose, the profoundest philosophical speculation that the human mind has ever known would have no raison d’être. But, as we study the philosophy of the Upanishads, the impression grows on us that the attainment of this path is not exactly the simplest of tasks. Our Western superciliousness in the face of these Indian insights is a mark of our barbarian nature, which has not the remotest inkling of their extraordinary depth and astonishing psychological accuracy. We are still so uneducated that we actually need laws from without, and a task-master or Father above, to show us what is good and the right thing to do. And because we are still such barbarians, any trust in human nature seems to us a dangerous and unethical naturalism. Why is this? Because under the barbarian’s thin veneer of culture the wild beast lurks in readiness, amply justifying his fear. But the beast is not tamed by locking it up in cage. There is no morality without freedom. When the barbarian lets loose the beast within him, that is not freedom but bondage. Barbarism must first be vanquished before freedom can be won. This happens, in principle, when the basic root and driving force of morality are felt by the individual as constituents of his own nature and not as external restrictions.” (Carl Gustav Jung, Swiss psychotherapist, 1875-1961)

“The Hindu creed is monotheistic and of very high ethical value; and when I look back on my life in India and the thousands of good friends I have left there among all classes of the native community, when I remember those honorable, industrious, orderly, law-abiding, sober, manly men, I look over England and wonder whether there is anything in Christianity which can give a higher ethical creed than that which is now professed by the large majority of the people of India. I do not see it in London society, I do not see it in the slums of the East End, I do not see it on the London Stock Exchange. I think that the morality of India will compare very favorably with the morality of any country in Western Europe.” (Sir Lepel Henry Griffin, British diplomat and writer, 1840-1908)

## 49. Fable

“Fables constitutes with the Hindus practical ethics – the science of Niti or Polity – the system of rules necessary for the good government of society in all matters not of a religious nature – the reciprocal duties of the members of an organized body either in their private or public relations. Hence it is specially intended for the education of

princes, and proposes to instruct them in those obligations which are common to them and their subjects, and those which are appropriate to their princely office; not only in regard to those over whom they rule, but in respect to other princes, under the contingencies of peace and war." "The Fables of the Hindus are a sort of machinery to which there is no parallel in the fabling literature of Greece and Rome." "In a manuscript of the Parable of Sendebar (Sindbad), which existed in the British Museum, it is repeatedly asserted in anonymous Latin notes that the work was translated out of the Indian language into Persian and Arabic, and from one of them into Hebrew." (Prof. Horace Hayman Wilson, British surgeon and orientalist, 1786-1860)

"The fables of animals, familiar to the Western world from the time of Aesop downwards, had their original home in India. The relation between the fox and the lion in the Greek versions had no reality in nature, but it was based upon the actual relation between the lion and his followers, the jackal, in the Sanskrit stories. Panchatantra was translated into the ancient Persian in the 6th century A.D. from that rendering all the subsequent versions in Asia Minor and Europe have been derived. The most ancient animal fables of India are at the present day the nursery stories of England and America. This graceful Hindu imagination delighted also in fairy tales, and the Sanskrit compositions of this class are the original source of many of the fairy stories of Persia, Arabia and Christendom." (Sir William Wilson Hunter, Scottish historian, 1840-1900)

"We have to admit that the beast-fable did not begin with him (Aesop), or in Greece at all. We have, in fact, to go East and to look to India and burrow in the 'tale of tales' of Hitopadesa to get an idea how old the antiquity of the fable actually is. When one remembers also that many of the stories in the Arabian Nights, including that of the famous Sindbad the Sailor, are of Hindu origin, it is not easy to accept the view that such tales are not of native Indian growth." (Ernest Rhys, Welsh-English writer, 1859-1946)

"It may also be a complete revelation to find that the fabulous Hindu mind is responsible for the genre of animal fables and many stories of the Arabian Nights type, in which Buddhist and non-Buddhist literature abounds." "India is the home of fables – one must say that the Hindu mind is fabulous. The genius for creating fables seems inexhaustible in Indian literature." (Lin Yutang, Chinese scholar and author, 1895-1976)

"Practically the entire fairy-lore of the Occident is derived from India. No one disputes this assertion today, but no one as yet can give a completely clear account of the ways and means by which its journey was accomplished." (Theodor Gomperz, Austrian scholar and philosopher, 1832-1912)

"Numerous European fairy stories, to be found in Grimm or Hans Andersen, including the magic mirror, the seven-leagued boots, Jack and the beanstalk, and the purse of Fortunatus, have been traced to Indian sources." "Many of them are to be found in the Gesta Romanorum, the Decameron, and the Merchant of Venice, is found in the

romance of Barlaam and Josaphat, which is too clearly the story of Buddha, who was changed into a Christian garb, and later canonized as a Christian saint as St. Josephat! And everyone of course knows the story of the Milkmaid who dreamt of her wedding and overthrew the milk pail, now to be recognized in its original form as the story of the Brahmin's Dream, included in the selections from the Panchatantra." (Sir Henry Creswicke Rawlinson, British politician and orientalist, 1810-1895)

"It is not necessary that I shall say whence I have taken the subjects of these new fables. I shall only say, from a sense of gratitude that I owe the largest portion of them to Pilpay the Indian sage." (Jean de La Fontaine, French poet, 1621-1695)

## 50. Mushika

मुनि-मूषिक-कथा "The story of the Muni and the mouse."

पुरातन-काले तपोवने In old times in the Tapovana [forest] कश्चिद् मुनिः आसीत् some Muni was living. तस्य नाम महातपाः His name was Mahātapāh. कदाचिद् सः मुनिः Once this Muni आश्रमस्य समीपे near (समीप) the Āshrama काक-मुखात् परिभ्रष्टम् from a crow's beak (काक-मुख) fallen एकम् मूषिक-शावकम् दृष्टवान् a baby (शावक) mouse he saw.

करुणया तम् मूषिक-शावकम् Mercifully that baby mouse आश्रमम् आनीतवान् to the Āshrama he brought. प्रतिदिनम् धान्य-कणान् दत्त्वा Giving every day pieces of grain तम् प्रीत्या पोषितवान् he nourished it with affection. अल्पेन एव कालेन Within a very short time मूषिकः सम्यक् प्रवृद्धः the mouse was fully grown up.

अथ कदाचिद् कश्चन मार्जालः Then once some cat (मार्जाल, same as मार्जार) तत्र आगतवान् came there. मार्जालात् भीतः मूषिकः The mouse, fearful of the cat मुनेः समीपम् आगत्य उक्तवान् coming near the Muni, said: पूज्य ! एषः मार्जालः Sir! this cat माम् खादितुम् आगच्छति comes to eat me. कृपया मार्जालात् Please, from the cat माम् रक्षतु भवान् इति You must protect me! मुनिः – भीतिः मा अस्तु The Muni [said]: Do not fear! भवन्तम् अपि You also अहम् मार्जालम् करोमि I make a cat. इति उक्त्वा Saying this स्व-तपः-प्रभावेण by the power of his austerities (तपस्) तम् मूषिकम् मार्जालम् कृतवान् that mouse he made a cat.

पुनः कदाचिद् कश्चन शुनकः Again once some dog तत्र आगतवान् came there. शुनकात् भीतः मार्जालः The cat, fearful of the dog (शुनक) मुनेः समीपम् आगत्य उक्तवान् coming close to the Muni, said: पूज्य, पश्यतु एतम् दुष्ट-शुनकम् Sir! See this rascal dog! सः माम् खादितुम् इच्छति He wants to eat me. कृपया शुनकात् Please, from the dog माम् रक्षतु भवान् इति You must protect me. मुनिः – चिन्ता मा अस्तु

The Muni [said]: Do not worry! भवन्तम् अपि You also अहम् शुनकम् करोमि I make a dog.

पुनः कदाचिद् Again, once कश्चन व्याघ्रः तत्र आगतवान् some tiger (व्याघ्र) came there. व्याघ्रात् भीतः शुनकः The dog, afraid of the tiger पुनः अपि मुनेः समीपम् एव again near to the Muni शरणम् गतवान् he went for shelter. मुनिम् उक्तवान् च – पूज्य And he said to the Muni: Sir! एतस्मात् भयङ्करात् व्याघ्रात् From this fearsome tiger माम् रक्षतु भवान् इति you must protect me. मुनिः यथा-पूर्वम् The Muni [said] as before: चिन्ताम् मा करोतु भवान् You should not worry. भवन्तम् अपि You also अहम् व्याघ्रम् करोमि I make a tiger.

अनन्तरम् च सः व्याघ्रः And then that tiger निर्भयेन आश्रमे सर्वत्र अटति roams fearlessly everywhere in the Āshrama. मुनिः तु But the Muni तम् व्याघ्रम् that tiger मूषिकम् इव पश्यति स्म saw like a mouse. तस्मात् व्याघ्रात् From that tiger तस्य तु किञ्चिद् अपि भयम् न आसीत् एव his fear was not the least.

आश्रमे अन्ये अपि जनाः In the Āshrama also other people वासम् कुर्वन्ति स्म were living ('made a home'). तम् व्याघ्रम् दृष्ट्वा Seeing that tiger, ते सर्वे वदन्ति स्म they all used to say: एषः व्याघ्रः वास्तविकः व्याघ्रः न This tiger is actually (वास्तविकः) not a tiger. सः तु कश्चन मूषिकः He is just a mouse. एषः मुनिः तपः-प्रभावेण This Muni, by the power of austerities तम् मूषिकम् व्याघ्रम् कृतवान् अस्ति made that mouse a tiger. अतः एषः Therefore, this is व्याघ्र-रूपः मूषिकः एव इति just a mouse in the shape of a tiger.

तद् श्रुत्वा व्याघ्रः चिन्तितवान् Hearing this, the tiger thought: यावत्-पर्यन्तम् एषः मुनिः जीवति As long as this Muni lives तावत्-पर्यन्तम् so long जनाः एवम् एव वदन्ति people will speak in this way. ते माम् मूषिकम् एव मन्यन्ते They consider me just a mouse न तु व्याघ्रम् and not a tiger. एषा अपकीर्तिः दूरी-करणीया चेद् If this infamy is to be removed मया मुनिः मारणीयः एव the Muni has to be killed by me. अतः तम् इदानीम् एव मारयामि Therefore, right now I kill him.

इति चिन्तयित्वा Thinking thus मुनेः समीपम् गतवान् he went near the Muni. परन्तु मुनिः But the Muni व्याघ्रस्य दुरालोचनम् ज्ञातवान् understood the evil intention (दुर्.आलोचन) of the tiger. कोपेन व्याघ्रम् दृष्ट्वा Looking with anger (कोप) at the tiger पुनः मूषिकः भव इति उक्त्वा saying, "Again become a mouse!" तम् व्याघ्रम् पुनः अपि मूषिकम् कृतवान् he made that tiger again a mouse. मूषिकः लज्जया The mouse with shame (लज्जा) ततः पलायनम् कृतवान् ran away from there.

## 51. Hitopadesha

प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं प्रभुम् । नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ॥
अधीत्येदं यथाशास्त्रं नरो जानाति सत्तमः । धर्मोपदेशविख्यातं कार्याकार्यं शुभाशुभम् ॥[43]
अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च । न पराभवमाप्नोति शक्रादपि कदाचन ॥[44]
श्रुतो हितोपदेशो ऽयं पाटवं संस्कृतोक्तिषु । वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥[45]

**Story 1 – Raja**

अस्ति भागीरथी-तीरे There is on the bank (तीर) of the Gangā (भागीरथी) पाटलिपुत्र-नाम-धेयम् नगरम् a city (नगर) by the name (नाम-धेय) Pātaliputra (modern Patna). तत्र सुदर्शनः नाम नर-पतिः आसीत् There was a king by the name (नामन्) Sudarshana. सः भू-पतिः एकदा Once (एकदा) that king श्लोक-द्वयम् शुश्राव he heard two verses (श्लोक):

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् । सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥[46]
यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥[47]
विष्णु-शर्मा-नामा महा-पण्डितः A great scholar with name Vishnu Sharmā अब्रवीत् spoke: षड्-मास-अभ्यन्तरे Within six (षष्) months (मास) भवत्-पुत्रान् Your sons अहम् नीति-शास्त्र-अभिज्ञान् करिष्यामि I will make aware of Nīti-Shāstra.

तस्य विष्णु-शर्मणः करे In the hand (कर) of that Vishnu Sharmā पुत्रान् समर्पितवान् he (the king) offered his sons. अथ प्रासाद-पृष्ठे Then on the roof of the palace राज-पुत्राणाम् पुरस्तात् before (पुरस्तात्) the princes पण्डितः अब्रवीत् the scholar spoke: भो राज-पुत्राः शृणुत O princes, listen!

वित्त-हीनाः [Though] bereft of wealth (वित्त) सुहृन्मताः बुद्धिमन्तः those who have friends (सुहृद्) and intelligence (बुद्धि) आशु कार्याणि साधयन्ति quickly accomplish their tasks (कार्य), काक-कूर्म-मृग-आखुवत् like crow (काक), tortoise (कूर्म), deer (मृग) and mouse. राज-पुत्राः ऊचुः The princes said: कथम् एतद् How (कथम्) is this? सः अब्रवीत् He (Vishnu Sharmā) said:

**2 – Kaka**

अथ कदाचिद् रात्रौ Now, once at night लघुपतनक-नामा वायसः the bird (crow) Laghupatanaka ('who flies quickly') व्याधम् अपश्यत् saw a hunter (व्याध). तेन व्याधेन By that hunter तण्डुल-कणान् विकीर्य [after] scattering grains (कण) of rice (तण्डुल) जालम् विस्तीर्णम् a net was spread. सः च तत्र प्रच्छन्नः भूत्वा स्थितः And he stayed there, being hidden.

अस्मिन् एव काले At that very time चित्रग्रीव-नामा कपोत-राजः the king of pigeons with name Citragrīva ('whose neck is multi-colored') स-परिवारः with his family तान् तण्डुल-कणान् अवलोकयामास he saw those grains of rice.

कपोत-राजः The king (राज = राजन्) of pigeons तण्डुल-कण-लुब्धान् कपोतान् प्रति to the pigeons who were greedy for the grains of rice आह he spoke: कुतः अत्र निर्जने वने What is here (अत्र) in the uninhabited forest (वन) तण्डुल-कणानाम् सम्भवः the possibility of rice grains? भद्रम् इदम् न पश्यामि I do not see this as a fortune. कङ्कणस्य तु लोभेन By greed (लोभ) for the bracelet (कङ्कण) यथा पथिकः सम्मृतः as the traveller died. कपोताः ऊचुः – कथम् एतद् The pigeons said: How was this? सः अब्रवीत् He (Citragrīva) said: एकदा दक्षिण-अरण्ये चरन् Once, wandering in the southern forest (अरण्य) अहम् अपश्यम् I saw [the following]:

**3 – Vyaghra**

एकः वृद्धः व्याघ्रः An old tiger सरः-तीरे ब्रूते on the river bank he spoke: भो भो पन्थाः O traveller! इदम् सुवर्ण-कङ्कणम् गृह्यताम् Please accept this golden bracelet! ततः केनचिद् पान्थेन आलोचितम् Then by some traveller it was considered: भाग्येन एतद् सम्भवति By good fortune this happens. किन्तु सर्वत्र अर्थ-अर्जन-प्रवृत्तौ But always in an activity to earn wealth सन्देहः एव there is doubt (risk). प्रकाशम् ब्रूते Loudly ('visibly') he spoke: कुत्र तव कङ्कणम् Where is your bracelet? व्याघ्रः हस्तम् प्रसार्य The tiger, stretching his hand दर्शयति would show it. पान्थः अवदत् The traveller spoke: मार-आत्मके त्वयि In you, who are death personified कथम् विश्वासः how can there be confidence (विश्वास)?

व्याघ्रः उवाच The tiger said: शृणु रे पान्थ Listen, O traveller! मे पुत्राः दाराः च मृताः My children and my wife died, अहम् वंश-हीनः च and [now] I am without family. ततः केनचिद् धार्मिकेण Then, by some religious man अहम् उपदिष्टः I was instructed: दान-धर्म-आदिकम् 'Charity (दान) and other religious observances (धर्म) चरतु भवान् इति You must do!' तद्-उपदेशात् इदानीम् Now, by his instruction अहम् स्नान-शीलः दाता I am dedicated to [religious] baths and giving [in charity]. वृद्धः गलित-नख-दन्तः Being old, my nails (नख) and teeth (दन्त) worn out कथम् न विश्वास-भूमिः how I am not an object of faith? तद् अत्र सरसि स्नात्वा Therefore, after bathing here in the lake सुवर्ण-कङ्कणम् इदम् गृहाण accept this golden bracelet!

ततः यावत् असौ Then as soon as he सरः स्नातुम् प्रविष्टः had entered the lake to bath, तावत् महा-पङ्के निमग्नः he sunk in deep mud (पङ्क). तम् पङ्के पतितम् दृष्ट्वा Seeing him fallen in deep mud व्याघ्रः अवदत् the tiger spoke: अहह महा-पङ्के पतितः असि Oho,

you are fallen in deep mud! अतः त्वाम् अहम् उत्थापयामि Therefore, I will lift you up. सः पान्थः अचिन्तयत् That traveller thought: तद् मया भद्रम् न कृतम् That was not done properly by me यद् अत्र मार-आत्मके that in death personified इति चिन्तयन् Thinking thus असौ व्याघ्रेण खादितः he was eaten by the tiger.

**2 – cont.**

अतः अहम् ब्रवीमि Therefore I say (Citragrīva speeking to his fellow pigeons): कङ्कणस्य तु लोभेन इत्यादि Out of greed for the bracelet, etc. [the traveller died]. एतद् वचनम् श्रुत्वा Hearing these words कश्चिद् कपोतः स-दर्पम् आह one pigeon (कपोत) spoke with pride (दर्प): सर्वत्र एवम् विचारे When there is such consideration in all matters भोजने अपि अ-प्रवर्तताम् there is non-engagement even in eating (भोजन). एतद् श्रुत्वा [After] hearing this तण्डुल-कण-लोभेन because of greed for the grains of rice सर्वे कपोताः तत्र उपविष्टाः all pigeons landed there. अनन्तरम् ते सर्वे Thereafter, all of them जाल-निबद्धाः बभूवुः were bound in the net. ततः यस्य वचनात् तत्र अवलम्बिताः Then, on whose word they had depended there तम् सर्वे तिरस्कुर्वन्ति स्म that one they all criticized.

तिरस्कारम् श्रुत्वा [After] hearing the criticism चित्रग्रीवः उवाच Citragrīva said: न अयम् अस्य दोषः It is not his fault (दोष). यतः Because: आपदाम् For calamities (आपद्) हितः अपि हेतुताम् आयाति even a friend (हित) becomes [sometimes] the instrument (हेतु). इदानीम् अपि एवम् क्रियताम् Even now let this be done. जालम् आदाय उड्डीयताम् taking the net, let us fly up. सर्वे पक्षिणः All the birds जालम् आदाय उत्पतिताः taking the net, they flew up.

अथ लुब्धकम् निवृत्तम् दृष्ट्वा Now seeing the hunter (लुब्धक_‘greedy man’) having stopped कपोताः ऊचुः the pigeons said: स्वामिन् Master (Citragrīva)! किम् इदानीम् कर्तुम् उचितम् What is now proper (उचित) to do? चित्रग्रीवः उवाच Citragrīva said: अस्माकम् मित्रम् Our friend हिरण्यकः नाम मूषिक-राजः Hiranyaka, the king of mice गण्डकी-तीरे चित्रवने निवसति lives at the bank of the Gandakī in the Citravana [forest]. सः अस्माकम् पाशान् छेत्स्यति He will cut our bonds.

इति आलोच्य Considering thus सर्वे हिरण्यक-समीपम् गताः they all went to Hiranyaka. पाश-बद्धान् एतान् दृष्ट्वा Seeing them caught in the net हिरण्यकः उवाच Hiranyaka said: सखे, किम् एतद् O friend! How is this? चित्रग्रीवः उवाच – सखे Citragrīva said: O friend! अस्माकम् प्राक्तन-जन्म-कर्मणः Of our Karma from a previous birth फलम् एतद् this is the fruit (फल). इति आकर्ण्य Hearing this कपोतानाम् बन्धनानि the bonds

of all the pigeons तेन छिन्नानि were cut by him (Hiranyaka) (after which the pigeons left).

अथ लघुपतनक-नामा काकः Now the crow (काक) Laghupatanaka सर्व-वृत्तान्त-दर्शी being witness to the whole affair (from the very beginning, when the hunter spread his net) स-आश्चर्यम् इदम् आह said the following with wonder (आश्चर्य): अहम् अपि I also त्वया सह मैत्रीम् कर्तुम् इच्छामि want to make friendship with you. हिरण्यकः विहस्य आह Hiranyaka, [after] laughing, said: का त्वया सह मैत्री What friendship is [possible] with you? यतः Because: भक्ष्य-भक्षकयोः प्रीतिः Love (प्रीति) between the food (भक्ष्य) and its eater विपत्तेः कारणम् मतम् is considered as cause (कारण) of misfortune (विपत्ति). शृगालात् पाश-बद्धः When caught in a trap (पाश) because of the jackal (शृगाल) मृगः काकेन रक्षितः the deer (मृग) was protected by the crow. वायसः अब्रवीत् – कथम् एतद् The crow said: How was this? हिरण्यकः कथयति Hiranyaka tells it:

**4 – Mriga**

अस्ति मगध-देशे There is in the country of Magadha चम्पकवती नाम अरण्यानी a wilderness (अरण्यानी f.) called Campakavatī. तस्याम् चिरात् In it, for a long time महता स्नेहेन मृग-काकौ निवसतः lived with great love (स्नेह) a deer and a crow. सः च मृगः And that deer [Citrānga ('beautiful limbs')] केनचिद् शृगालेन अवलोकितः was seen by some jackal. तम् दृष्ट्वा शृगालः अचिन्तयत् Seeing him, the jackal thought: अः एतद् मांसम् Ah, this delicious flesh (मांस) कथम् भक्षयामि how can I eat it?

इति आलोच्य उपसृत्य Thinking thus and approaching him अब्रवीत् he said: मित्र, कुशलम् ते O friend! Are you happy? मृगेण उक्तम् – कः त्वम् The deer said: Who are you? सः ब्रूते He said: क्षुद्रबुद्धि-नामा जम्बुकः अहम् I am the jackal Kshudrabuddhi ('evil-minded'). अत्र अरण्ये बन्धु-हीनः Here in the forest without any friend (बन्धु) एकाकी निवसामि I live alone. ततः पश्चात् Thereafter तौ मृगस्य वास-भूमिम् गतौ they both went to the place of residence of the deer. तत्र सुबुद्धि-नामा काकः निवसति There the crow Subuddhi ('good-wit') lives मृगस्य चिर-मित्रम् as the deer's long-time (चिर) friend.

तौ दृष्ट्वा Seeing both of them काकः अवदत् the crow said [to the deer]: सखे चित्राङ्ग Friend Citrānga! कः अयम् द्वितीयः Who is this second (द्वितीय) one? मृगः ब्रूते The deer said: अस्मद्-सख्यम् इच्छन् Desiring our friendship (सख्य) अयम् जम्बुकः आगतः this jackal has come. काकः ब्रूते The crow said: कस्यचिद् अ-ज्ञात-कुल-शीलस्य "To anyone of unknown family (कुल) and character (शील) वासः न देयः residence (वास) should not be given. मार्जारस्य हि दोषेण By the fault (दोष) of the cat (मार्जार)

गृध्रः जरद्गवः हतः the vulture (गृध्र) Jaradgava ('old bull') was killed." तौ आहतुः – कथम् एतद् They both (deer and jackal) said: How was that? काकः कथयति The crow says:

**5 – Marjara**

अस्ति भागीरथी-तीरे There is on the bank of the Gangā (Bhāgīrathī) गृध्रकूट-नाम्नि पर्वते on the Gridhra-kūta ('vulture-peak') mountain (पर्वत) महान् पर्कटी-वृक्षः a big Parkatī tree. तस्य कोटरे In its hollow गलित-नख-नयनः with broken claws and eyesight जरद्गव-नामा गृध्रः प्रतिवसति the vulture Jaradgava ('old bull') lives. अथ कृपया तद्-जीवनाय Now, out of mercy (कृपा), for his living तद्-वृक्ष-वासिनः पक्षिणः the birds residing in that tree स्व-आहारात् from their own food किञ्चिद् किञ्चिद् उद्धृत्य setting apart each a little तस्मै ददति they would give it to him. तेन असौ जीवति By that he would live तेषाम् शावक-रक्षाम् च करोति and do the protection of their babies.

अथ कदाचिद् दीर्घकर्ण-नामा मार्जारः Once the cat Dīrghakarna ('long-eared') पक्षि-शावकान् भक्षयितुम् to eat the baby birds तत्र आगतः it came there. ततः तम् आयान्तम् दृष्ट्वा Then, seeing him (the cat) approaching भय-आर्तैः पक्षि-शावकैः by the fear-stricken baby birds [in the tree] कोलाहलः कृतः a loud sound was made. तद् श्रुत्वा जरद्गवेन उक्तम् Hearing this [sound], it was said by Jaradgava: कः अयम् आयाति Who is this coming? गृध्रम् अवलोक्य Seeing the vulture दीर्घकर्णः स-भयम् आह [the cat] Dīrghakarna said [to himself] in fear: हा, हतः अस्मि Alas! I am dead. अथवा However:

तावद्भयस्य भेतव्यं यावद्भयमनागतम्। आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम्॥48

इति आलोच्य तम् उपसृत्य Considering thus and approaching him अब्रवीत् [the cat] said [to the vulture Jaradgava]: आर्य, त्वाम् अभिवन्दे Sir! I praise you. गृध्रः अवदत् – कः त्वम् The vulture said: Who are you? सः अवदत् – मार्जारः अहम् He said: I am a cat. गृध्रः ब्रूते – दूरम् अपसर The vulture said: Go far away! नो चेद् हन्तव्यः असि मया If not, then you are to be killed by me. मार्जारः अवदत् The cat said:

श्रूयताम् तावत् मद्-वचनम् First hear my words! अत्र गङ्गा-तीरे Here at the bank of the Gangā चान्द्रायण-व्रतम् आचरन् observing the vow (व्रत) of Cāndrāyana (a difficult fast) अहम् तिष्ठामि I dwell. यूयम् धर्म-ज्ञान-रताः You are devoted to the knowledge of Dharma (duty, virtue) इति पक्षिणः सर्वे thus all birds सर्वदा प्रस्तुवन्ति always declare before me. अतः Therefore भवद्भ्यः from You धर्मम् श्रोतुम् to hear about Dharma

इह आगतः I have come here. भवन्तः च But You मामू अतिथिम् me, a guest (अतिथि) हन्तुम् उद्यताः You are ready to kill.

गृध्रः अवदत् The vulture said: मार्जारः हि मांस-रुचिः A cat is fond of flesh. पक्षि-शावकाः च अत्र निवसन्ति And here are living the babies of the birds. तेन अहम् एवम् ब्रवीमि Therefore I would speak so [before]. तद् श्रुत्वा Hearing that [excuse] मार्जारः भूमिम् स्पृष्ट्वा the cat, after touching the earth (भूमि) कर्णौ स्पृशति touches the ears (कर्ण) (a gesture indicating innocence). एवम् विश्वास्य After thus creating confidence सः मार्जारः तरु-कोटरे स्थितः that cat would stay in the hollow of the tree.

ततः दिनेषु गच्छत्सु Then, as days (दिन) were passing पक्षि-शावकान् स्व-कोटरम् आनीय bringing baby-birds to his hollow असौ प्रत्यहम् खादति he (the cat) eats everyday. ततः जिज्ञासा समारब्धा here and there an enquiry (जिज्ञासा) was started. तद् परिज्ञाय On understanding this मार्जारःपलायितः the cat fled. पश्चात् तत्र तरु-कोटरे Later, there in the hollow of the tree पक्षिभिः by the birds शावक-अस्थीनि प्राप्तानि the bones (अस्थि) of the babies were found. अनेन एव शावकाः खादिताः 'By him (the vulture) alone the babies were eaten' इति सर्वैः पक्षिभिः निश्चित्य after this was concluded by all the birds सः गृध्रः व्यापादितः that vulture was killed.

**4 – cont.**

अतः अहम् ब्रवीमि Therefore I say: अज्ञात-कुल-शीलस्य इत्यादि To one of unknown family and character etc. [residence should not be given]. इति आकर्ण्य Hearing this सः जम्बुकः स-कोपम् आह that jackal said with anger: भवान् अपि You [crow] also अज्ञात-कुल-शीलः एव आसीत् were of unknown family and character.

अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्॥[49]
यथा च अयम् मृगः मम बन्धुः And as this deer is my friend तथा भवान् अपि so are You too. मृगः अब्रवीत् The deer said: किम् अनेन उत्तरोत्तरेण What is the use of such argumentation? सर्वैः एकत्र With all together सुखम् happily स्थीयताम् we should stay. काकेन उक्तम् – एवम् अस्तु The crow said: So be it!

एकदा शृगालः ब्रूते Once the jackal said [to the deer]: सखे मृग Deer, my friend! एतस्मिन् एव वने In this very forest क्षेत्रम् अस्ति is a field (क्षेत्र). तद् दर्शयामि I will show it. तथा कृते सति That being done मृगः प्रत्यहम् तत्र गत्वा the deer, going there daily सस्यम् खादति would eat the grain. ततः Then क्षेत्र-पतिना by the owner (पति) of the field पाशाः तत्र योजिताः snares were fixed there. तत्र चरन् पाशैः बद्धः Walking there and being caught by the snares मृगः अचिन्तयत् the deer thought: व्याध-पाशात्

From the hunter's net मित्रात् अन्यः other than a friend कः माम् त्रातुम् समर्थः who is able to deliver me?

अत्र अन्तरे जम्बुकः तत्र आगत्य Soon the jackal came there अचिन्तयत् and thought: अस्थीनि The bones मम भोजनानि भविष्यन्ति will be my meals. मृगः And that deer तम् दृष्ट्वा उल्लासितः ब्रूते delighted after seeing him (the jackal), said: सखे Friend! छिन्धि तावत् मम बन्धनम् Cut my bond now! यतः Because:

आपत्सु मित्रं जानीयाद् रणे शूरमृणे शुचिम् । भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥[50]
जम्बुकः आहा – सखे The jackal said: O friend! स्नायु-निर्मिताः पाशाः The snares (पाश) are made of intestines, कथम् एतान् दन्तैः स्पृशामि how can I touch them with the teeth (दन्त)? अनन्तरम् सः काकः Then the crow मृगम् the deer अन्विष्यन् searching तथा-विधम् तम् दृष्ट्वा [and then] finding him (the deer) in such a state उवाच – सखे ! he (the crow) said: O friend! उक्तम् एव मया पूर्वम् I have told it before!

दुर्जनेन समं सख्यं वैरं चापि न कारयेत् । उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥[51]
सखे मृग O friend deer! त्वम् आत्मानम् मृतवत् सन्दर्श्य Showing yourself as if dead तिष्ठ be still! यदा अहम् शब्दम् करोमि When I make a sound (शब्द) तदा उत्थाय then, getting up त्वम् सत्वरम् पलायिष्यसे you should quickly flee. मृगः तथा एव The deer exactly काक-वचनेन स्थितः stayed by the words of the crow. ततः क्षेत्र-पतिना Then by the field-owner तथा-विधः मृगः आलोकितः the deer was seen in that state. आः स्वयम् मृतः असि 'Ah, you are dead of yourself!' इति उक्त्वा After thus saying मृगम् बन्धनात् मोचयित्वा freeing the deer from the snare सयत्नः बभूव he was bussy. मृगः काकस्य शब्दम् श्रुत्वा The deer, hearing the sound of the crow सत्वरम् उत्थाय पलायितः quickly getting up, fled. तम् उद्दिश्य Seeing him (the deer) तेन क्षेत्र-पतिना by that field-owner प्रकोपात् क्षिप्तेन thrown in anger लगुडेन शृगालः व्यापादितः by a stick the jackal was killed.

**2 – cont.**

अतः अहम् ब्रवीमि Therefore I (the mouse Hiranyaka) say: भक्ष्य-भक्षकयोः प्रीतिः इत्यादि Love between the food and its eater, etc. [causes misfortune]. लघुपतनकः ब्रूते Laghupatanaka said: तव द्वारि at your door (द्वार्) आत्मानम् व्यापादयिष्यामि इति I will kill myself. तद्-वचनम् आकर्ण्य Hearing these words हिरण्यकः आह Hiranyaka said: आप्यायितः अहम् I am pleased भवताम् एतेन वचन-अमृतेन by this your nectarian word. ततः प्रभृति Beginning from that time कुशल-प्रश्नैः with nice questions (प्रश्न) कियत् कालः अतिवर्तते some time would pass. एकदा लघुपतनकः हिरण्यकम् आह One day, Laghupatanaka spoke to Hiranyaka:

सखे Friend! वायसस्य इदम् स्थानम् For a crow this place (स्थान) कष्टतर-लभ्य-आहारम् is more difficult for getting food. तद् एतद् परित्यज्य Therefore, leaving this [place] स्थान-अन्तरम् गन्तुम् इच्छामि I want to go to another place. हिरण्यकः ब्रूते Hiranyaka said:

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः। इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥52
काकः ब्रूते – मित्र The crow said: Friend! कापुरुषस्य वचनम् एतद् This is the word of a coward. यतः Because:

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषाः गजाः। तत्रैव निधनं यान्ति काकाः कापुरुषाः मृगाः ॥53
हिरण्यकः ब्रूते – मित्र Hiranyaka said: Friend! क्व गन्तव्यम् Where will you go?

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्। नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥54
वायसः ब्रूते – मित्र The crow said: Friend! अस्ति दण्डक-अरण्ये There is in the Dandaka forest कर्पूर-गौर-अभिधानम् सरः a lake known as Karpūra-gaura ('camphor-yellowish'). तत्र There मे प्रिय-सुहृद् my long-time-acquired (old) and dear friend मन्थर-अभिधानः कूर्मः the tortoise (कूर्म) Manthara प्रतिवसति lives. अथ वायसः तेन मित्रेण सह Then the crow, with his friend तस्य सरसः समीपम् ययौ went to the vicinity of that lake. ततः मन्थरः आह Then Manthara said:

उपार्जितानां वित्तानां त्याग एव हि रक्षणम्। तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥55
अतिसञ्चय-शीलः अयम् जम्बुकः The overaccumulating jackal (जम्बुक) धनुषा हतः was killed by the bow (धनुस्). तौ आहतुः – कथम् एतद् The two (crow and mouse) said: How was this? मन्थरः कथयति Manthara says:

**6 – Jambuka**

आसीत् There was भैरवः नाम व्याधः a hunter named Bhairava. सः च एकदा He once धनुः आदाय taking the bow विन्ध्या-अटवी-मध्यम् गतः went inside the forest of the Vindhyā [mountains]. तत्र तेन एकः मृगः व्यापादितः There by him one deer was killed. ततः Then तेन by him शूकरः दृष्टः a fierce boar was seen. ततः मृगम् भूमौ निधाय Then, putting the deer down on the earth तेन शूकरः शरेण हतः the boar was hit by him with an arrow. शूकरेण अपि हतः [But] by the boar (शूकर) also being hit सः व्याधः that hunter पपात he died ('fell'). अथ तयोः पाद-आस्फालनेन Now, by their both foot-trampling एकः सर्पः अपि मृतः one snake (सर्प) also died.

अत्र अन्तरे Thereafter दीर्घरावः नाम जम्बुकः a jackal named Dīrgha-rāva ('long-howl') तान् मृतान् मृग-व्याध-सर्प-शूकरान् those dead deer, hunter, snake and boar अपश्यत् he saw. आलोक्य अचिन्तयत् च Seeing them he thought: प्रथम-बुभुक्षायाम् In the first

hunger इदम् निःस्वादु स्नायु-बन्धनम् this tasteless sinew-string (बन्धन) कोदण्ड-लग्नम् खादामि which is fixed to the bow I eat. (Why leave it for someone else to eat?) इति उक्त्वा तथा अकरोत् Speaking thus, he did so. ततः छिन्ने स्नायु-बन्धने Then, when the sinew-string was cut द्रुतम् उत्पतितेन धनुषा by the bow who was quickly jumping up हृदि निर्भिन्नः being pierced in the heart (हृद्) सः दीर्घरावः पञ्चत्वम् गतः that jackal Dīrgharāva attained death (पञ्चत्व_the 'fivefold state', when the body is dissolved into the five elements).

**2 – cont.**

अतः अहम् ब्रवीमि Therefore I say:

सुखमापतितं सेव्यं दुःखमापतितं तथा। चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ॥[56]

**1 – cont.**

अथ राज-पुत्रैः स-आनन्दम् उक्तम् Now the princes spoke with delight: सर्वे श्रुतवन्तः सुखिनः वयम् Hearing it, we are all happy. सिद्धम् नः समीहितम् Our (नः, from अस्मद्) aspiration has been fulfilled.

## 52. Ramayana[57]

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम्। श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् ॥[58]
पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः। आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥[59]
ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम्। वव्रिरे च वरानिष्टान् अस्मादाश्रितवत्सलात् ॥[60]
रावणो मानुषादन्यैर् अवध्यत्वं तथानुजः। निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च ॥[61]
विभीषणो विष्णुभक्तिं वव्रे सत्त्वगुणान्वितः। तेभ्य एतान्वरान्दत्त्वा तत्रैवान्तर्दधे प्रभुः ॥[62]
रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम्। लङ्कापुरीं पुष्पकं च हृत्वा तत्रावसत्सुखम् ॥[63]
आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः। भार्यास्तिस्रोऽपि लब्ध्वासौ तासु लेभे न सन्ततिम्॥[64]
ततः सुमन्त्रवचनाद् ऋष्यशृङ्गं स भूपतिः। आनीय पुत्रकामेष्टिम् आरेभे सपुरोहितः ॥[65]
पूर्णे काले ऽथ कौसल्या सज्जनाम्भोजभास्करम्। अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥[66]
ततो लक्ष्मणशत्रुघ्नौ सुमित्राजीजनत्सुतौ। अकारयत्पिता तेषां जातकर्मादिकं द्विजैः ॥[67]
ततो ववृधिरे ऽन्योन्यं स्निग्धाश्चत्वार एव ते। सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥[68]
ततः कदाचिदागत्य विश्वामित्रो महामुनिः। ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥[69]
वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम्। कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥[70]
तौ गृहीत्वा ततो गच्छन् बलामतिबलां तथा। अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥[71]
गच्छन्सहानुजो रामः कौशिकेन प्रचोदितः। ताडकाम् अवधीद्धीमान् लोकपीडनतत्पराम् ॥[72]
ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः। अध्वरं च समारेभे राक्षसाश्च समागमन् ॥[73]

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे। सुबाहुप्रमुखान्हत्वा यज्ञं चापालयन्मुनेः ॥74
कौशिकेन ततो रामो नीयमानः सहानुजः। अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥75
जनकेनार्चितो रामः कौशिकेन प्रचोदितः। सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥76
ततो दशरथं दूतैर् आनाय्य मिथिलाधिपः। रामादिभ्यस्तत्सुतेभ्यः सीताद्याः कन्यका ददौ ॥77
तदाकर्ण्य धनुर्भङ्गम् आयान्तं रोषभीषणम्। विजित्य भार्गवं रामम् अयोध्यां प्राप राघवः ॥78
ततः सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः। तामध्युवास काकुत्स्थः सीतया सहितः सुखम् ॥79
इति श्रीरामोदन्ते बालकाण्डः समाप्तः।80

ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः। अभिषेकाय रामस्य समारेभे मुदान्वितः ॥81
कैकेयी तु महीपालं मन्थरादूषिताशया। वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम् ॥82
वनवासाय रामस्य राज्याप्त्यै भरतस्य च। तस्या वरद्वयं कृच्छ्रम् अनुजज्ञे महीपतिः ॥83
रामं तदैव कैकेयी वनवासाय चादिशत्। अनुज्ञाप्य गुरून्सर्वान् निर्ययौ च वनाय सः ॥84
दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः। सन्त्यज्य स्वगृहान्सर्वे पौराश्चानुययुर्द्रुतम् ॥85
सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः। गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥86
भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः। राघवस्तस्य निर्देशाच् चित्रकूटेऽवसत्सुखम् ॥87
अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः। राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम् ॥88
तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः। रामरामेति विलपन् देहं त्यक्त्वा दिवं ययौ ॥89
अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा। वनायैव ययौ रामम् आनेतुं नागरैः सह ॥90
चतुर्दश समा नीत्वा पुनरैष्याम्यहं पुरीम्। इत्युक्त्वा पादुके दत्त्वा तं रामः प्रत्ययापयत् ॥91
गृहीत्वा पादुके तस्माद् भरतो दीनमानसः। नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥92
राघवस्तु गिरेस्तस्माद् गत्वात्रिं समवन्दत। तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत् ॥93
उषित्वा तु निशामेकाम् आश्रमे तस्य राघवः। विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥94
इति श्रीरामोदन्ते अयोध्याकाण्डः समाप्तः।

व्रजन्वनेन काकुत्स्थो विराधं विधिचोदितम्। सदारानुजमात्मानं हरन्तमवधीत्तदा ॥95
शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः। प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥96
तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः। अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥97
रामाय वैष्णवं चापम् ऐन्द्रं तूणीयुगं तथा। ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसम्भवः ॥98
ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम्। पर्णशालामध्युवास सीतया सहितः सुखम् ॥99
तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाभिका। तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥100
राममेव ततो वव्रे कामार्ता कामसन्निभम्। पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥101
लक्ष्मणेन तदा रोषात् कृत्तश्रवणनासिका। सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥102
तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ। दूषणत्रिशिरोमुख्यैर् यातुधानैः समन्वितः ॥103
तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः। खरं सहानुगं सङ्ख्ये जघान लघुविक्रमः ॥104

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता। न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः॥105
तच्छ्रुत्वा रावणः सीतां हर्तुं कृतमतिस्तदा। मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत्॥106
सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत्। सा तु तं मृगमाहर्तुं भर्तारं समयाचत॥107
नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः। अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे॥108
विव्याध च मृगं रामः स निजं रूपमास्थितः। हा सीते लक्ष्मणेत्येवं रुदन्प्राणान्समत्यजत्॥109
एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम्। तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम्॥110
तदन्तरं समासाद्य रावणो यतिरूपधृत्। सीतां गृहीत्वा प्रययौ गगनेन मुदान्वितः॥111
ततो जटायुरालोक्य नीयमानां तु जानकीम्। प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम्॥112
छित्त्वैनं चन्द्रहासेन पातयित्वा च भूतले। गृहीत्वा रावणः सीतां प्राविशन्निजमन्दिरम्॥113
अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम्। रावणो रक्षितुं चैनां नियुयोज निशाचरीः॥114
हत्वा रामस्तु मारीचम् आगच्छन्ननुजेरिताम्। वार्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत्॥115
अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे। सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः॥116
तेनोक्तां जानकीवार्तां श्रुत्वा पश्चान्मृतं च तम्। दग्ध्वा सहानुजो रामश् चक्रे तस्योदकक्रियाम्॥117
इति श्रीरामोदन्ते आरण्यकाण्डः समाप्तः।

हनुमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ। प्राप्य ज्ञात्वा तु वृत्तान्तं तेन तौ समयोजयत्॥118
ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः। सख्यं च कारयामास तयोः पावकसन्निधौ॥119
प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम्। दर्शयिष्यामि वैदेहीम् इत्यन्येन च संश्रुतम्॥120
हेममाली ततो वाली तारयाभिहितं हितम्। निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम्॥121
बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत्। सोऽपि राम इति ज्ञात्वा त्यक्त्वा देहं दिवं ययौ॥122
सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरान्। न्ययुङ्क्त सीतामन्वेष्टुम् आशासु चतसृष्वपि॥123
ततो हनुमत्प्रमुखा वानरा दक्षिणां दिशम्। गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन्॥124
समयातिक्रमात्तत्र चक्रुः प्रायोपवेशनम्। तेऽत्र सम्पातिना प्रोक्तां सीतावार्तां च शुश्रुवुः॥125
इति श्रीरामोदन्ते किष्किन्धाकाण्डः समाप्तः।

अभिवन्द्याथ सकलान् अमरान्पवनात्मजः। पुप्लुवे च गिरेस्तस्माद् विलङ्घयितुमर्णवम्॥126
स समुल्लङ्घ्य मैनाकं सुरसामभिवन्द्य च। निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः॥127
लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः। सीतां विचिन्वन्नद्राक्षीन् निद्राणं निशि रावणम्॥128
अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः। अशोकवनिकां गत्वा सीतां खिन्नां ददर्श सः॥129
पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः। आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन्॥130
रावणस्तु तदाभ्येत्य मैथिलीं मदनार्दितः। भार्या भव ममेत्येवं बहुधा समयाचत॥131
निर्गते रावणे सीतां प्रलपन्तीं स मारुतिः। उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम्॥132
तत्समादाय वैदेही विलप्य च भृशं पुनः। चूडामणिं ददौ तस्य करे सा मारुतेः प्रियम्॥133
नीतिमान्सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत्। अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत्॥134

ततः शक्रजिता युद्धे बद्धः पवननन्दनः। प्रतापं रघुनाथस्य रावणाय न्यवेदयत् ॥135
रक्षोदीपितलाङ्गूलः स तु लङ्कामशेषतः। दग्ध्वा सागरमुत्तीर्य वानरान्समुपागमत् ॥136
स गत्वा वानरैः साकं राघवायात्मना कृतम्। निवेदयित्वा सकलं ददौ चूडामणिं च तम् ॥137
इति श्रीरामोदन्ते सुन्दरकाण्डः समाप्तः।

अथासङ्ख्यैः कपिगणैः सुग्रीवप्रमुखैः सह। निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधेः ॥138
तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत्। लङ्काधिपत्येऽभ्यषिञ्चद् एनं रामोऽरिमर्दनः ॥139
दत्तमार्गः समुद्रेण तत्र सेतुं नलेन सः। कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम् ॥140
ततो राघवनिर्दिष्टा नीलमुख्याः प्लवङ्गमाः। रुरुधुः सर्वतो लङ्कां वृक्षपाषाणपाणयः ॥141
रावणस्य नियोगेन निर्गतान्युधि राक्षसान्। प्रहस्तप्रमुखान्हत्वा नेदुस्ते सिंहविक्रमाः ॥142
रावणिस्तु तदाभ्येत्य समरे रामलक्ष्मणौ। ननाह नागपाशेन नागारिस्तौ व्यमोचयत् ॥143
रावणोऽपि ततो युद्धे राघवेण पराजितः। कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च ॥144
ततो वानरसङ्घांश्च भक्षयन्तं निशाचरम्। इन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम् ॥145
ततो रावणसन्दिष्टः शक्रजिद्राघवौ रणे। ब्रह्मास्त्रेण च तौ बद्धा वानरांश्चावधीच्छरैः ॥146
अथ जाम्बवतो वाक्याद् गत्वा चौषधिपर्वतम्। मारुतिश्चौषधीस्तत्रादृष्ट्वा कोपं चकार सः ॥147
भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः। तासां गन्धेन वै सर्वान् राघवादीनजीवयत् ॥148
कृत्वा चिरं तत्र युद्धम् ऐन्द्रेणास्त्रेण वै रुषा। शिरश्चिच्छेद सौमित्रिर् दशाननसुतस्य हि ॥149
अथागस्त्यस्य वचनाद् रावणं लोककण्टकम्। जघान रामो लक्ष्मीवान् ब्राह्मेणास्त्रेण तं रणे ॥150
विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः। कारयामास लक्ष्मीवान् अनुजेनाभिषेचनम् ॥151
ततः पुष्पकमारुह्य सह मित्रैर्जगत्पतिः। भार्यानुजाभ्यां सहितः किष्किन्धां प्राप राघवः ॥152
रामोऽथ सह सङ्गम्य भरतेनारिघातिना। अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिनन्दितः ॥153
अथाभिषेकं रामस्य वसिष्ठाद्या मुदान्विताः। सहिता मन्त्रिभिश्चक्रुर् वसवो वासवं यथा ॥154
इति श्रीरामोदन्ते युद्धकाण्डः समाप्तः।

राजा पर्यग्रहीदेव भार्यां रावणदूषिताम्। इत्यज्ञजनवादेन रामस्तत्याज मैथिलीम् ॥155
तद्विदित्वाथ वाल्मीकिर् आनीयैनां निजाश्रमम्। अन्तर्वत्नीं समाश्वास्य तत्रैवावासयत्सुखम् ॥156
ऋषिभिः प्रार्थितस्याथ राघवस्य नियोगतः। शत्रुघ्नो लवणं युद्धे निहत्यैनानपालयत् ॥157
रामे हेममयीं पत्नीं कृत्वा यज्ञं वितन्वति। आनीय ससुतां सीतां तस्मै प्राचेतसो ददौ ॥158
शङ्क्यमाना पुनश्चैवं रामेण जनकात्मजा। भूम्या प्रार्थितया दत्तं विवरं प्रविवेश सा ॥159
इति श्रीरामोदन्ते उत्तरकाण्डः समाप्तः।

एकश्लोकि रामायणम्

आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम्।
बालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं पश्चाद्रावणकुम्भकर्णहननमेतद्धि रामायणम् ॥160

## 53. Association

“To render the construction of the Samscred language, and its emphatic mode of expression, more familiar to their pupils, the Guru employs various short sentences clothed in Samscred verse, which are called Shloga. These verses serve not only as examples of the manner in which the words must be combined with each other, but contain, at the same time, most excellent moral maxims, which are thus imprinted in the minds of the young people as if in play; so that, while learning the language, they are taught rules proper for forming their character, and directing their future conduct in life. That the reader may be better enabled to conceive some idea of the morality of the Brahmans, I shall here subjoin a specimen of these sentences. ... The wounds occasioned by a slanderous tongue occasion far more pain, and are much more difficult to be healed, than those which proceed from fire and the sword. ... He who revenges an injury enjoys a pleasure which endures only a day; but he who forgives receives a satisfaction which will accompany him through life.” (Paulinus of St. Bartholomew, Austrian Carmelite missionary and Orientalist, 1748-1806)

श्लोकेन वा तदर्धेन तदर्धार्धाक्षरेण वा। अबन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मभिः ॥[161]
यादृशैः सन्निवसति यादृशांश्चोपसेवते। यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥[162]

Indicators:

आचारः कुलमाख्याति देशमाख्याति भाषणम्। सम्भ्रमः स्नेहमाख्याति वपुराख्याति भोजनम्॥[163]
तुष्यन्ति भोजने विप्रा मयूरा घनगर्जिते। साधवः परसम्पत्तौ खलाः परविपत्तिषु ॥[164]
मूर्खाणां पण्डिता द्वेष्या निर्धनानां महाधनाः। व्रतिनः पापशीलानाम् असतीनां कुलस्त्रियः ॥[165]
लुब्धानां याचकः शत्रुर् मूर्खानां बोधको रिपुः। जारस्त्रीणां पतिः शत्रुश् चौराणां चन्द्रमा रिपुः॥[166]

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा ॥[167]
स्वर्गस्थितानामिह जीवलोके चत्वारि चिह्नानि वसन्ति देहे।
दानप्रसङ्गो मधुरा च वाणी देवार्चनं ब्राह्मणतर्पणं च ॥[168]

तितिक्षवः कारुणिकाः सुहृदः सर्वदेहिनाम्। अजातशत्रवः शान्ताः साधवः साधुभूषणाः ॥[169]

दरिद्रता धीरतया विराजते कुवस्त्रता शुभ्रतया विराजते।
कदन्नता चोष्णतया विराजते कुरूपता शीलतया विराजते ॥[170]

गुणो भूषयते रूपं शीलं भूषयते कुलम्। सिद्धिर्भूषयते विद्यां भोगो भूषयते धनम् ॥
निर्गुणस्य हतं रूपं दुःशीलस्य हतं कुलम्। असिद्धस्य हता विद्या ह्यभोगेन हतं धनम् ॥[171]

Sva-Bhāva:

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः। अतीत्य हि गुणान्सर्वान् स्वभावो मूर्ध्नि वर्तते ॥[172]
दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता। अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः ॥[173]
पूर्वे वयसि यः शान्तः स शान्त इति मे मतिः। धातुषु क्षीयमाणेषु शमः कस्य न जायते ॥[174]

To be avoided:

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान्प्रियान्पाणिनेर्
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्
अज्ञानावृतचेतसामतिरुषां को ऽर्थस्तिरश्चां गुणैः ॥[175]

उपसर्गे ऽन्यचक्रे च दुर्भिक्षे च भयावहे। असाधुजनसम्पर्के यः पलायेत्स जीवति ॥[176]
रोहते सायकैर्विद्धं छिन्नं रोहति चासिना। वचो दुरुक्तं बीभत्सं न प्ररोहति वाक्क्षतम् ॥[177]
अहो खलभुजङ्गस्य विपरीतो वधक्रमः। कर्णे लगति चान्यस्य प्राणैरन्यो वियुज्यते ॥[178]
दुर्जनस्य च सर्पस्य वरं सर्पो न दुर्जनः। सर्पो दंशति काले तु दुर्जनस्तु पदे पदे ॥[179]
दुर्जनैरुच्यमानानि सम्मतानि प्रियाण्यपि। अकालकुसुमानीव भयं सञ्जनयन्ति हि ॥[180]
प्रणयादुपकाराद्वा यो विश्वसिति शत्रुषु। स सुप्त इव वृक्षाग्रात् पतितः प्रतिबुध्यते ॥[181]
स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्। अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च ॥[182]
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्। वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥[183]

वरं न राज्यं न कुराजराज्यं  वरं न मित्रं न कुमित्रमित्रम्।
वरं न शिष्यो न कुशिष्यशिष्यो  वरं न दारा न कुदारदारः ॥[184]

शकटं पञ्चहस्तेन दशहस्तेन वाजिनम्। हस्ती हस्तसहस्रेण देशत्यागेन दुर्जनम् ॥[185]
हस्ती अङ्कुशमात्रेण वाजी हस्तेन ताड्यते। शृङ्गी लगुडहस्तेन खड्गहस्तेन दुर्जनः ॥[186]

Friends:

आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुसङ्कटे। राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥[187]
ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति। भुङ्क्ते भोजायते चैव षड्विधं प्रीतिलक्षणम् ॥[188]

## 54. Dharma Defined

"They (Indians) are remarkably brave, and superior in war to all Asiatics; they are remarkable for integrity; they are so reasonable as seldom to have recourse to law suits, and so honest as to require neither locks to their doors nor writings to bind their agreements. They are in the highest degree truthful." (Lucius Flavius Arrian, Greek historian and military commander, c. 87-150 CE)

धर्म is derived from √धृ, 'that which supports', maintains, holds up – a 'natural duty' to uphold society for the overall and ultimate best of all.

धारणाद्धर्ममित्याहुर् धर्मेण विधृताः प्रजाः । यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ॥[189]

धर्म or duties can be grouped into:

(**1**) **Virtues**, described as four legs of धर्म

| | (1) | (2) | (3) | (4) |
|---|---|---|---|---|
| | सत्य | दम, शौच | दान, दया | तपः, विद्या |
| regulated by | | विवाह | यज्ञ | सुरा |

वेदस्योपनिषत्सत्यं सत्यस्योपनिषद् दमः । दमस्योपनिषद् दानं दानस्योपनिषत् तपः ।
तपसोपनिषत् त्यागस् त्यागस्योपनिषत् सुखम्॥[190]

मुक्तिमिच्छसि चेत्तात विषयान्विषवत् त्यज । क्षमार्जवदयाशौचं सत्यं पीयूषवत्पिब ॥[191]

सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा । शान्तिः पत्नी क्षमा पुत्रः षडेते मम बान्धवाः॥[192]

(**2**) स्व-धर्म in society acc. to गुण/स्व-भाव

(**3**) Tradition – esp. **Sacraments** (संस्कार) in different stages of life, see **13. Samskara**

(**4**) Law and Government, see **75. Government**

(**5**) Religion – Worship (भगवद्धर्म) for Liberation (मोक्ष), see **101. Yoga**

There is a concept, that धर्म repays five Debts (ऋण). महाभारत divides धर्म into 4 external and 4 internal rules. In Yoga or अष्टाङ्ग-योग there is a similar division into यम and नियम. In स्मृति-शास्त्र, धर्म is divided into public welfare (पूर्त) and rites (इष्ट).

Although duties are eternal (सनातन-धर्म) for men, they are not the same for everyone; and because of changing circumstances in human society, certainly not a set of doctrines, but liable to change.

कारणाद्धर्ममन्विच्छेन् न लोकचरितं चरेत् ।[193] स एव धर्मः सो ऽधर्मो देशकाले प्रतिष्ठितः ।[194]

"O sage! भीष्म, the knower of eternal principles, duly described – through many stories and histories, according to वर्ण and आश्रम, and according to the स्वभाव of a man, characterizing both in terms of what is mentioned as वैराग्य and राग, with their subdivisions, in summary and explicit, together with their means – the following: धर्म

for charity, for kings, for liberation, for women, towards God, and also the four धर्म-अर्थ-काम-मोक्ष."[195]

आहारनिद्राभयमैथुनं च  सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो  धर्मेण हीनाः पशुभिः समानाः ॥[196]
येषां न विद्या न तपो न दानं  ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूता  मनुष्यरूपेण मृगाश्चरन्ति ॥[197]

एतावज्जन्मसाफल्यं देहिनामिह देहिषु। प्राणैरर्थैर्धिया वाचा श्रेय आचरणं सदा ॥[198]
यज दुर्जनसंसर्गं भज साधुसमागमम्। कुरु पुण्यमहोरात्रं स्मर नित्यमनित्यतः ॥[199]
धनस्य यस्य राजतो भयं न चास्ति चौरतः। मृतं च यन्न मुच्यते समर्जयस्व तद्धनम् ॥[200] अकृतेष्वेव कार्येषु मृत्युर्वै सम्प्रकर्षति। युवैव धर्मशीलः स्याद् अनिमित्तं हि जीवितम् ।
कृते धर्मे भवेत्प्रीतिर् इह प्रेत्य च शाश्वती ॥[201]
अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत्। गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥[202]
विद्या मित्रं प्रवासेषु भार्या मित्रं गृहेषु च। व्याधितस्यौषधं मित्रं धर्मो मित्रं मृतस्य च ॥[203]
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः। शरीरेण समं नाशं सर्वमन्यदिह गच्छति ॥[204]
चला लक्ष्मीश्चलाः प्राणाश् चले जीवितमन्दिरे। चलाचले च संसारे धर्म एको हि निश्चलः ॥[205]
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः। स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥[206]
एक एव चरेद्धर्मं न धर्मध्वजिको भवेत्। धर्मवाणिजका ह्येते ये धर्ममुपभुञ्जते ॥[207]
धर्मेणापिहितो धर्मो धर्ममेवानुवर्तते ।[208]

## 55. Self-Preservation

शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः। शरीराच्च्यवते धर्मः पर्वतात्सलिलं यथा ॥[209]
सिंहादेकं बकादेकं शिक्षेच्चत्वारि कुक्कुटात्। वायसात्पञ्च शिक्षेच्च षट् शुनस्त्रीणि गर्दभात् ॥[210]
प्रभूतं कार्यमल्पं वा यन्नरः कर्तुमिच्छति। सर्वारम्भेण तत्कार्यं सिंहादेकं प्रचक्षते ॥[211]
इन्द्रियाणि च संयम्य बकवत्पण्डितो नरः। देशकालबलं ज्ञात्वा सर्वकार्याणि साधयेत् ॥[212]
प्रत्युत्थानं च युद्धं च संविभागं च बन्धुषु। स्वयमाक्रम्य भुक्तं च शिक्षेच्चत्वारि कुक्कुटात् ॥[213]
गूढमैथुनं चारित्वं काले काले च सङ्ग्रहम्। अप्रमत्तमविश्वासं पञ्च शिक्षेच्च वायसात् ॥[214]
बह्वाशी स्वल्पसन्तुष्टः सनिद्रो लघुचेतनः। स्वामिभक्तश्च शूरश्च षड् एते श्वानतो गुणाः ॥[215]
सुश्रान्तोऽपि वहेद्भारं शीतोष्णं न च पश्यति। सन्तुष्टश्चरते नित्यं त्रीणि शिक्षेच्च गर्दभात् ॥[216]
य एतान्विंशतिगुणान् आचरिष्यति मानवः। कार्यावस्थासु सर्वासु अजेयः स भविष्यति ॥[217]

Duty in times of emergency:

आहारो मैथुनं निद्रा सेव्या नाति हि रुग्भवेत् ।[218]
देशभङ्गे प्रवासे वा व्याधिषु व्यसनेष्वपि । रक्षेदेव स्वदेहादि पश्चाद्धर्मं समाचरेत् ॥

आपत्काले तु सम्प्राप्ते शौचाचारं न चिन्तयेत्। स्वयं समुद्धरेत्पश्चात् स्वस्थो धर्मं समाचरेत्॥[219]
जीवितात्ययमापन्नो योऽन्नमत्ति ततस्ततः। आकाशमिव पङ्केन न स पापेन लिप्यते॥[220]

Suicide discouraged:

यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद। विषमग्निं जलं रज्जुमास्थास्ये तव कारणात्॥[221]
अतिमानादतिक्रोधात् स्नेहाद्वा यदि वा भयात्। उद्बध्नीयात्स्त्री पुमान्वा गतिरेषा विधीयते।
पूयशोणितसम्पूर्णे अन्धे तमसि मज्जति॥[222]

Sorrow:

शब्दे स्पर्शे रसे रूपे गन्धे च रमते मनः। तेषु भोगेषु सर्वेषु न भीतो लभते सुखम्॥[223]
मानसेन हि दुःखेन शरीरमुपताप्यते। अयःपिण्डेन तप्तेन कुम्भसंस्थमिवोदकम्॥[224]
सन्तापाद् भ्रश्यते रूपं सन्तापाद् भ्रश्यते बलम्। सन्तापाद् भ्रश्यते ज्ञानं सन्तापाद् व्याधिमृच्छति॥[225]
निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः। सर्वार्था व्यवसीदन्ति व्यसनं चाधिगच्छति॥[226]
द्विविधे जायते व्याधिः शारीरो मानसस्तथा। परस्परं तयोर्जन्म निर्द्वन्द्वं नोपपद्यते॥[227]
प्रज्ञया मानसं दुःखं हन्याच्छारीरमौषधैः।[228]
मतिमन्तो ह्यतो वैद्याः शमं प्रागेव कुर्वते। मानसस्य प्रियाख्यानैः सम्भोगोपनयैर्नृणाम्॥[229]
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति। दुःखेन लभते दुःखं द्वावनर्थौ प्रपद्यते॥
भैषज्यमेतद् दुःखस्य यदेतन्नानुचिन्तयेत्। चिन्त्यमानं हि न व्येति भूयश्चापि प्रवर्धते॥[230]
गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत्। वर्तमानेन कालेन वर्तयन्ति विचक्षणाः॥[231]
यत्र नैव शरैः कार्यं न भृत्यैर्न च बन्धुभिः। आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितम्॥[232]
दुःखमेवास्ति न सुखं यस्मात्तदुपलक्ष्यते। दुःखार्तस्य प्रतीकारे सुखसञ्ज्ञा विधीयते॥[233]
सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम्। उपानद्गूढपादस्य ननु चर्मावृतेव भूः॥[234]

## 56. Artha

The objects of human life (पुरुषार्थ), धर्म-अर्थ-काम plus मोक्ष, called त्रि-/चतुर्-वर्ग, are rooted in धर्म.

धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते। जन्मजन्मनि मर्त्येषु मरणं तस्य केवलम्॥[235]
धर्ममूलोऽर्थविटपस् तथा कामफलो महान्। त्रिवर्गपादपस्तत्र रक्षया फलभाग्भवेत्॥[236]
उपायं धर्ममेवाहुस् त्रिवर्गस्य विशाम्पते। लिप्समानो हि तेनाशु कक्षेऽग्निरिव वर्धते॥[237]

Be active:

आश्रितानां भृतौ स्वामि-सेवायां धर्मसेवने। पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः॥[238]
उद्योगे नास्ति दारिद्र्यं जपतो नास्ति पातकम्। मौनेन कलहो नास्ति नास्ति जागरिते भयम्॥[239]
पश्य कर्मवशात्प्राप्तं भोज्यकालेऽपि भोजनम्। हस्तोद्यमं विना वक्त्रे प्रविशेन्न कथञ्चन॥[240]
सुखं दुःखान्तमालस्यं दाक्ष्यं दुःखं सुखोदयम्। भूतिः श्रीर्ह्रीर्धृतिः कीर्तिर् दक्षे वसति नालसे॥[241]
आलस्यापगता विद्या परहस्तगतं धनम्। अल्पबीजं हतं क्षेत्रं हतं सैन्यमनायकम्॥[242]
दोषभीतेरनारम्भस् तत्कापुरुषलक्षणम्। कैरजीर्णभयाद् भ्रातर् भोजनं परिहीयते॥[243]

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता । निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥244
धनधान्यप्रयोगेषु विद्यासङ्ग्रहणेषु च । आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥245
श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् । न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥246
दिवसेनैव तत्कुर्याद् येन रात्रौ सुखं वसेत् । अष्टमासेन तत्कुर्याद् येन वर्षाः सुखं वसेत् ॥
पूर्वे वयसि तत्कुर्याद् येन वृद्धः सुखं वसेत् । यावज्जीवेन तत्कुर्याद् येन प्रेत्य सुखं वसेत् ॥247

Destiny and own activity:

क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् । क्षेत्रबीजसमायोगात् ततः सस्यं समृद्ध्यते ॥248
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् । तथा पुरुषकारेण विना दैवं न सिद्ध्यति ॥249
उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः । न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥250
यथाग्निः पवनोद्धूतः सुसूक्ष्मो ऽपि महान्भवेत् । तथा कर्मसमायुक्तं दैवं साधु विवर्धते ॥
यथा तैलक्षयाद्दीपः प्रह्रासमुपगच्छति । तथा कर्मक्षयाद्दैवं प्रह्रासमुपगच्छति ॥251

Poverty:

धनमार्जय काकुत्स्थ धनमूलमिदं जगत् । अन्तरं नाभिजानामि निर्धनस्य मृतस्य च ॥252
उपासते ये गृहस्थाः परपाकमबुद्धयः । तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनः ॥253
कष्टं च खलु मूर्खत्वं कष्टं च खलु यौवनम् । कष्टात्कष्टतरं चैव परगेहनिवासनम् ॥254
अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च । मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ॥255
शुष्कस्य कीटखातस्य वह्निदग्धस्य सर्वतः । तरोरप्यूषरस्थस्य वरं जन्म न चार्थिनः ॥256
न तथा बाध्यते लोके प्रकृत्या निर्धनो जनः । यथा द्रव्याणि सम्प्राप्य तैर्विहीनोऽसुखे स्थितः ॥257

Respect:

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः । यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥258
ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनम् । शशिनस्तुल्यवंशो ऽपि निर्धनः परिभूयते ॥259
निर्धनं पुरुषं वेश्या प्रजा भग्नं नृपं त्यजेत् । खगा वीतफलं वृक्षं भुक्त्वा चाभ्यागतो गृहम् ॥260
तावत्प्रीतिर्भवेल्लोके यावद्दानं प्रदीयते । वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ॥261

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयं पत्रफलाम्बुसेवनम् ।
तृणेषु शय्या शतजीर्णवल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥262
त्यजन्ति मित्राणि धनैर्विहीनं पुत्राश्च दाराश्च सुहृज्जनाश्च ।
तमर्थवन्तं पुनराश्रयन्ति अर्थो हि लोके मनुषस्य बन्धुः ॥263
तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव अन्यः क्षणेन भवतीति विचित्रमेतत् ॥264

Service:

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर । एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनो ऽर्थिभिः ॥265
सेवकः स्वामिनं द्वेष्टि कृपणं परुषाक्षरम् । आत्मानं किं स न द्वेष्टि सेव्यासेव्यं न वेत्ति यः ॥266
भूशय्या ब्रह्मचर्यं च कृशत्वं लघुभोजनम् । सेवकस्य यतेर्यद्वद् विशेषः पापधर्मजः ॥267
शीतातपादिकष्टानि सहते यानि सेवकः । धनाय तानि चाल्पानि यदि धर्माय मुच्यते ॥268

कान्तावियोगः स्वजनापमानो रणस्य शेषः कुनृपस्य सेवा ।

दारिद्रभावो विषमा सभा च  विनाग्निनैते प्रदहन्ति कायम् ॥[269]

But:

त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि। यथादेशं यथाकालं यावद्दैवोपपादितम् ॥[270]
कः कालः कानि मित्राणि को देशः कौ व्ययागमौ। कश्चाहं का च मे शक्तिर् इति चिन्त्यं मुहुर्मुहुः ॥[271]
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्। सत्यपूतां वदेद्वाक्यं मनःपूतं समाचरेत् ॥[272]
अनालोक्य व्ययं कर्ता अनाथः कलहप्रियः। आतुरः सर्वक्षेत्रेषु नरः शीघ्रं विनश्यति ॥[273]
एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात्। एको न गच्छेदध्वानं नैकश्चार्थान्प्रचिन्तयेत् ॥[274]
यो ध्रुवाणि परित्यज्य अध्रुवं परिषेवते। ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥[275]
चिरकारिक भद्रं ते भद्रं ते चिरकारिक। चिरकारी हि मेधावी नापराध्यति कर्मसु ॥[276]
अतिक्लेशेन ये चार्था धर्मस्यातिक्रमेण तु। शत्रूणां प्रणिपातेन ते ह्यर्था मा भवन्तु मे ॥[277]

## 57. Ahimsa

हिंसा defined:

उद्वेगजननं हिंसा सन्तापकरणं तथा। रुक्कृतिः शोणितकृतिः पैशुण्यकरणं तथा ॥
हितस्यातिनिषेधश्च मर्मोद्घाटनमेव च। सुखापह्नुतिः संरोधो वधो दशविधा च सा ॥[278]

धर्म is measured in अ-हिंसा :

“The first limb of Yoga is Yama (prohibitions), and Ahimsā is its first item. Without Ahimsā the other limbs of Yoga are, as it were, not performed. Abstinence from injury means not causing pain to any living creature at any time. The Yamas and Niyamas that follow have their origin in it. They are meant to achieve it. They are taught with the object of teaching it. They are taken up with the object of rendering the light of its appearance purer. And so it has been said: As the Brāhmana goes on undertaking many of a vow of restraint and observance, he goes on turning away from the sins committed on account of forgetfulness, and having their origin in injury caused to others; and by so doing he goes on rendering the Ahimsā itself purer and purer.” (Yoga-Sūtra-Bhāshya 2.30)

When श्री-कृष्ण declares that, “Even a rogue, if he worships Me exclusively, is to be considered साधु ...”, He immediately clarifies, that a true भक्त “will quickly become धर्मात्मा” also. (भगवद्गीता 9.30-31)

न चक्षुषा न मनसा न वाचा दूषयेदपि। न प्रत्यक्षं परोक्षं वा दूषणं व्याहरेत्क्वचित् ॥
न हिंस्यात्सर्वभूतानि मैत्रायणगतश्चरेत्। नेदं जीवितमासाद्य वैरं कुर्वीत केनचित् ॥[279]

हिंसा as an insult to the Creator:

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥[280]

अभ्यर्चयित्वा प्रतिमासु विष्णुं  निन्दन् जने सर्वगतं तमेव।
अभ्यर्च्य पादौ हि द्विजस्य मूर्ध्नि  द्रुह्यन्निवाज्ञो नरकं प्रयाति ॥[281]

How to judge it?
आत्मौपम्येन मन्तव्यं बुद्धिमद्भिः कृतात्मभिः ।[282]
यदन्यैर्विहितं नेच्छेद् आत्मनः कर्म पूरुषः। न तत्परेषु कुर्वीत जानन्नप्रियमात्मनः ॥[283]
As धर्म is the basis of त्रि-वर्ग, अहिंसा is the basis of all धर्म:
न भूतानामहिंसाया ज्यायान्धर्मोऽस्ति कश्चन ।[284] अहिंसा परमं मित्रम् अहिंसा परमं सुखम्।[285]
अहिंसा defines all other virtues, and even सत्य, which is otherwise praised as the highest virtue:
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम्। स्थितिर्हि सत्यं धर्मस्य तस्मात्सत्यं न लोपयेत्॥
सत्यस्य वचनं श्रेयः सत्यादपि हितं वदेत्। यद्भूतहितमत्यन्तम् एतत्सत्यं मतं मम ॥[286]
सर्वस्वस्यापहारे तु वक्तव्यमनृतं भवेत्। तत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत्।
तस्माद्धर्मार्थमनृतम् उक्त्वा नानृतभाग्भवेत् ॥[287]

Once some robbers, in search of fleeing travellers, reached the hut of a hermit. After reminding him of his vow of सत्य, the hermit pointed out the path the travellers had taken. His सत्य became falsehood.

कृते प्रतिकृतिं कुर्याद् धिंसने प्रतिहिंसनम्। तत्र दोषो न पतति दुष्टे दुष्टं समाचरेत् ॥[288]

## 58. Meat-Eating

अन्नाद्दशगुणं पिष्टं पिष्टाद्दशगुणं पयः। पयसोऽष्टगुणं मांसं मांसाद्दशगुणं घृतम् ॥[289]
न मांसात्परमं किञ्चिद् रसतो विद्यते भुवि। क्षतक्षीणाभितप्तानां ग्राम्यधर्मरतात्मनाम्।
अध्वना कर्शितानां च न मांसाद्विद्यते परम् ॥[290]
But:
स्वमांसं परमांसेन यो वर्धयितुमिच्छति। नास्ति क्षुद्रतरस्तस्मान् न नृशंसतरो नरः ॥[291]
रसवीर्यविपाका हि श्वमांसस्यापि वैद्यके। कीर्तिता इति तत्किं स्याद् भक्षणीयं विचक्षणैः ॥[292]
For many Hindus, अहिंसा includes a vegetarian diet:
नो दया मांसभोजिनः ।[293]
राजपुत्र चिरं जीव मा जीव मुनिपुत्रक। जीव वा मर वा साधो व्याध मा जीव मा मर ॥[294]
अनुमन्ता विशसिता निहन्ता क्रयविक्रयी। संस्कर्ता चोपहर्ता च खादकश्चेति घातकाः ॥[295]
And the very word for meat (मांस) is said to support this:
मां स भक्षयितामुत्र यस्य मांसमिहाद्म्यहम्। एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥[296]
ये त्वनेवंविदोऽसन्तः स्तब्धाः सदभिमानिनः। पशून्द्रुह्यन्ति विश्रब्धाः प्रेत्य खादन्ति ते च तान् ॥[297]
Meat-eating, and even garlic and onions, are forbidden for ब्राह्मण:
गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः। नावेदविहितां हिंसाम् आपद्यपि समाचरेत् ॥
समुत्पत्तिं च मांसस्य वधबन्धौ च देहिनाम्। प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ॥[298]

छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् । पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद् द्विजः ॥[299]
चतुष्पात्सकलो धर्मो ब्राह्मणस्य विधीयते । पादावकृष्टो राजन्ये तथा धर्मो विधीयते ॥[300]
Concession for यज्ञ:
यज्ञाय जग्धिर्मांसस्येत्येष दैवो विधिः स्मृतः । अतो ऽन्यथा प्रवृत्तिस्तु राक्षसो विधिरुच्यते ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् । वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
ओषध्यः पशवो वृक्षास् तिर्यञ्चः पक्षिणस्तथा । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः ॥[301]
श्रुति declared that अश्वमेध can counteract even ब्रह्महत्या, which was always disputed:
यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् । भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥[302]
हिंसा is a law of nature:
अहस्तानि सहस्तानाम् अपदानि चतुष्पदाम् । फल्गूनि तत्र महतां जीवो जीवस्य जीवनम् ॥[303]
ततस्ताभ्यो ददावन्नम् ओषधीः स्थावराणि च । जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ॥[304]
It cannot be avoided:
ओषध्यो वीरुधश्चैव पशवो मृगपक्षिणः । अन्नादिभूता भूतानाम् इत्यपि श्रूयते श्रुतिः ॥
कृषिं साध्विति मन्यन्ते तत्र हिंसा परा स्मृता । कर्षन्तो लाङ्गलैः पुंसो घ्नन्ति भूमिशयान्बहून् ।
जीवानन्यांश्च बहुशस् तत्र किं प्रतिभाति ते ॥ जीवा हि बहवो ब्रह्मन् वृक्षेषु च फलेषु च ।
उदके बहवश्चापि तत्र किं प्रतिभाति ते ॥[305]
पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥[306]
Concession for hunting:
नात्मानमपरित्यज्य मृगया नाम विद्यते । समतामुपसङ्गम्य भूतं हन्यन्ति हन्ति वा ॥
अतो राजर्षयः सर्वे मृगयां यान्ति भारत । न हि लिप्यन्ति पापेन न चैतत्पातकं विदुः ॥[307]
But:

सर्वे वेदा न तत्कुर्युः सर्वे यज्ञाश्च भारत । यो भक्षयित्वा मांसानि पश्चादपि निवर्तते ॥
दुष्करं च रसज्ञाने मांसस्य परिवर्जनम् । चर्तुं व्रतमिदं श्रेष्ठं सर्वप्राण्यभयप्रदम् ॥[308]
अद्रोहेणैव भूतानाम् अल्पद्रोहेण वा पुनः । या वृत्तिः स परो धर्मस् तेन जीवामि जाजले ॥[309]

## 59. Mother Cow

"Others, the most ignoble and largest of all, though they kill not, nevertheless eat, all sorts of Animals good for food, except Cows; to kill and eat which all in general abhor, saying that the Cow is their Mother, for the Milke she gives and the Oxen she breeds, which plough the Earth and do a thousand other services ..." (Pietro Della Valle, Italian musicologist and traveller, 1586-1652)

The cow is लक्ष्मी personified:
पयसा हविषा दध्ना शकृता चाथ चर्मणा । अस्थिभिश्चोपकुर्वन्ति शृङ्गैर्वालैश्च भारत ।
नासां शीतातपौ स्यातां सदैताः कर्म कुर्वते ॥[310] गावो लक्ष्म्यास्तथा मूलं गोषु दत्तं न नश्यति ।[311]
सर्वे देवा गवामङ्गे तीर्थानि तत्पदेषु च । तद्गुह्येषु स्वयं लक्ष्मीस् तिष्ठत्येव सदा पितः ।

गावस्तिष्ठन्ति यत्रैव तत्तीर्थं परिकीर्तितम् ॥[312]
मातरः सर्वभूतानां गावः सर्वसुखप्रदाः । वृद्धिमाकाङ्क्षता नित्यं गावः कार्याः प्रदक्षिणाः ॥[313]
कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव । गवां प्रशस्यते वीर सर्वपापहरं शिवम् ॥[314]
सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः । गावो मामुपतिष्ठन्ताम् इति नित्यं प्रकीर्तयेत् ॥[315]
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा । गावोऽस्माकं वयं तासां यतो गावस्ततो वयम् ॥[316]

"Cow-protection is an article of faith in Hinduism. Apart from its religious sanctity, it is an ennobling creed. Cow protection is the dearest possession of the Hindu heart. It is the one concrete belief common to all Hindus. No one who does not believe in cow-protection can possibly be called a Hindu. ... For me the cow is the personification of innocence. Cow protection means the protection of the weak and helpless." (Mohandas Gandhi, Indian politician, 1869-1948)

अङ्गुष्ठमात्रः स्थूलो वा बाहुमात्रः प्रमाणतः । आर्द्रस्तु सपलाशश्च दण्ड इत्यभिधीयते ॥[317]
गवाशनेषु विक्रीणंस् ततः प्राप्नोति गोवधम् । गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः ।
न वारयन्ति तां तेषां सर्वेषां पातकं भवेत् ॥[318]

From about 1750 onwards a very large number of cows were daily slaughtered by the British for their army and civilian personnel in India. The Muslim community was encouraged by the British to take up the slaughter of cattle, as the large number of slaughterhouses set up by the British required professional butchers. In 1880-1894 there was a movement against cow killing in which many prominent Muslims actively participated, because a majority of Muslims in India did not eat the flesh of cow.

"I doubt whether, since the Mutiny, any movement containing in it a greater amount of potential mischief has engaged the attention of the Government of India." (Henry Petty-Fitzmaurice Lansdowne, Viceroy of India, 1845-1927)

The British largely succeeded in projecting this movement as a conflict between Hindus and Muslims.

"The British Origin of Cow-Slaughter in India (Dharampal 2002) – besides providing historical evidence about the genesis of mass cow-slaughter under British auspices, presents extensive documentary material about one of the most significant resistance movements in India against kine-killing by the British during the years 1880-1894. By highlighting the support given by some prominent Muslims during phases of this mass protest as well as by emphasising the crucial fact that it was the British and not the Muslims who were the main consumers of beef, Dharampal is able to dispel one of the deep-seated myths perpetuated in the interest of reinforcing divisive colonial strategies." (Wikipedia)

"Though the Muhammadan's cow killing is made the pretext for the agitation, it is, in fact, directed against us, who kill far more cows for our army, etc., than the Muhammadans." (Queen Victoria, 1819-1901)

## 60. Satya

नित्यं क्रोधात्तपो रक्षेच् छ्रियं रक्षेच्च मत्सरात्। विद्यां मानावमानाभ्याम् आत्मानं तु प्रमादतः॥
आनृशंस्यं परो धर्मः क्षमा च परमं बलम्। आत्मज्ञानं परं ज्ञानं न सत्याद्विद्यते परम्॥[319]
सत्यस्य वचनं साधु न सत्याद्विद्यते परम्। सत्येन विधृतं सर्वं सर्वं सत्ये प्रतिष्ठितम्॥
अपि पापकृतो रौद्राः सत्यं कृत्वा पृथक्पृथक्। अद्रोहमविसंवादं प्रवर्तन्ते तदाश्रयाः॥[320]
न ह्यसत्यात्परो ऽधर्म इति होवाच भूरियम्। सर्वं सोढुमलं मन्ये ऋते ऽलीकपरं नरम्॥[321]

The last instruction of a teacher to his graduated student:

सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। मातृदेवो भव। पितृदेवो भव।
आचार्यदेवो भव। अतिथिदेवो भव।[322]

How to speak:

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः। तस्मात्तदेव वक्तव्यं वचने का दरिद्रता॥[323]
अहिंसयैव भूतानां कार्यं श्रेयो ऽनुशासनम्। वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥[324]
सत्यं ब्रूयात्प्रियं ब्रूयान् न ब्रूयात्सत्यमप्रियम्। प्रियं च नानृतं ब्रूयाद् एष धर्मः सनातनः॥[325]

On the other hand:

लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा। मूर्खं छन्दो ऽनुवृत्त्या च यथार्थत्वेन पण्डितम्॥[326]
सुलभाः पुरुषा राजन् सततं प्रियवादिनः। अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः॥[327]
पृष्टः प्रियहितं ब्रूयान् न ब्रूयादहितं प्रियम्। अप्रियं वा हितं ब्रूयाच् छृण्वतो ऽनुमतो मिथः॥[328]

Secrets:

आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्। तपो दानावमानौ च नव गोप्यानि यत्नतः॥[329]
आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः। बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम्॥[330]
मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत्। मन्त्रेण रक्षयेद्गूढं कार्ये चापि नियोजयेत्॥[331]

When not to speak:

नापृष्टः कस्यचिद् ब्रूयान् नाप्यन्यायेन पृच्छतः। ज्ञानवानपि मेधावी जडवत्समुपाविशेत्॥[332]
न विश्वसेत्कुमित्रे च मित्रे चापि न विश्वसेत्। कदाचित्कुपितं मित्रं सर्वं गुह्यं प्रकाशयेत्॥[333]
पयःपानं भुजङ्गानां केवलं विषवर्धनम्। उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये॥[334]

## 61. Shauca

शौचं च द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम्॥
आशौचाद्धि वरं बाह्यं तस्मादाभ्यन्तरं वरम्। उभाभ्यां च शुचिर्यस्तु स शुचिर्नेतरः शुचिः॥[335]

External purity:

अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्। प्रक्षालनेन त्वल्पानाम् अद्भिः शौचं विधीयते॥
मार्जारमक्षिकाकीट-पतङ्गकृमिदर्दुराः। मेध्यामेध्यं स्पृशन्त्येनं नोच्छिष्टान्मनुरब्रवीत्॥
अदुष्टाः सन्तता धारा वातोद्धूताश्च रेणवः। स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन॥[336]
खननाद्दहनाद्वर्षाद्गोभिराक्रमणादपि।चतुर्भिःशुध्यतेभूमिःपञ्चमाच्चोपलेपनात्॥

रजसा शुध्यते नारी नदी वेगेन शुध्यति। भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ॥[337]
मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् ॥
आपो हि ष्ठादिभिर्मान्त्रं मृदालम्भस्तु पार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥
यत्तु सातपवर्षेण स्नानं तद् दिव्यमुच्यते। अवगाहो वारुणं स्यान् मानसं ह्यात्मचिन्तनम् ॥[338]
मृदा जलेन शुद्धिः स्यान् न क्लेशो न धनव्ययः ।[339]
अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम्। आर्द्रेण वाससा वापि मार्जनं दैहिकं विदुः॥[340]
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः। परिजप्य च मन्त्राणि भक्षयेद्दन्तधावनम् ॥
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥[341]
खदिरश्च करञ्जश्च कदम्बश्च वटस्तथा। तिन्तिडी वेणुपृष्ठं च आम्रनिम्बौ तथैव च ॥
अपामार्गश्च बिल्वश्च अर्कश्चौदुम्बरस्तथा। बदरीतिन्दुकास्त्वेते प्रशस्ता दन्तधावने ॥[342]
अन्नं बुभुक्षमाणस्तु त्रिर्मुखेन स्पृशेदपः। भुक्त्वा चान्नं तथैव त्रिर् द्विः पुनः परिमार्जयेत् ॥[343]
वालेन तु न भुञ्जीत ।[344]

"A surprising spirit of cleanliness is to be observed among the Hindoos; the streets of their villages are commonly swept and watered, and sand is frequently strewed before the doors of the houses. The simplicity, and perfectly modest character, of the Hindoo women, cannot but arrest the attention of a stranger. With downcast eye, and equal step, they proceed along, and scarcely turn to the right or to the left to observe a foreigner as he passes, however new or singular his appearance. The men are no less remarkable for their hospitality, and are constantly attentive to accommodate the traveller in his wants." (William Hodges, British painter and traveller, 1744-1797)

## 62. Dama

जिह्वैकतोऽच्युत विकर्षति मावितृप्ता शिश्नोऽन्यतस्त्वगुदरं श्रवणं कुतश्चित्।
घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर् बह्व्यः सपत्न्य इव गेहपतिं लुनन्ति ॥[345]
अदान्तः पुरुषः क्लेशम् अभीक्ष्णं प्रतिपद्यते। अनर्थांश्च बहूनन्यान् प्रसृजत्यात्मदोषजान् ॥[346]
न यमं यममित्याहुर् आत्मा वै यम उच्यते। आत्मा संयमितो येन तं यमः किं करिष्यति ॥
न तथासिस्तथा तीक्ष्णः सर्पो वा दुरधिष्ठितः। यथा क्रोधो हि जन्तूनां शरीरस्थो विनाशकः ॥[347]
इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य यत्नतः। सर्वतो निष्पतिष्णूनि पिता बालानिवात्मजान् ॥[348]
तावज्जितेन्द्रियो न स्याद् विजितान्येन्द्रियः पुमान्। न जयेद्रसनं यावज् जितं सर्वं जिते रसे ॥[349]
निषण्णश्चापि खादेत न तु गच्छन्कदाचन ।[350]
दीपो भक्षयते ध्वान्तं कज्जलं च प्रसूयते। यदन्नं भक्ष्यते नित्यं जायते तादृशी प्रजा ॥[351]
नास्ति कामसमो व्याधिर् नास्ति मोहसमो रिपुः। नास्ति कोपसमो वह्निर् नास्ति ज्ञानात्परं सुखम् ॥[352]
दममेव प्रशंसन्ति वृद्धाः श्रुतिसमाधयः। सर्वेषामेव वर्णानां ब्राह्मणस्य विशेषतः ॥[353]
आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ।[354]

बलेन परराष्ट्राणि गृह्णन् शूरस्तु नोच्यते। जितो येनेन्द्रियग्रामः स शूरः कथ्यते बुधैः ॥[355]

धनेन किं यो न ददाति नाश्नुते  बलेन किं यश्च रिपून्न बाधते।
श्रुतेन किं यो न च धर्ममाचरेत्  किमात्मना यो न जितेन्द्रियो भवेत् ॥[356]

## 63. Dana

अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम्। रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥[357]
यद्ददाति विशिष्टेभ्यो यज्जुहोति दिने दिने। तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति ॥[358]
अलब्धं चैव लिप्सेत लब्धं रक्षेत्प्रयत्नतः। रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत् ॥[359]
अहन्यहनि दातव्यम् अदीनेनान्तरात्मना। स्तोकादपि प्रयत्नेन दानमित्यभिधीयते ॥[360]
सन्तोषस्त्रिषु कर्तव्यः स्वदारे भोजने धने। त्रिषु चैव न कर्तव्योऽध्ययने जपदानयोः ॥[361]

Most difficult:

कः कस्य चोपकुरुते कश्च कस्मै प्रयच्छति। प्राणी करोत्ययं कर्म सर्वमात्मार्थमात्मना ॥[362]
दातव्यमित्ययं धर्म उक्तो भूतहिते रतैः। तं मन्यन्ते धनयुताः कृपणैः सम्प्रवर्तितम्।
यदा नियतिकार्पण्यम् अथैषामेव रोचते ॥[363]
दानान्न दुष्करं तात पृथिव्यामस्ति किञ्चन। अर्थे च महती तृष्णा स च दुःखेन लभ्यते ॥
परित्यज्य प्रियान्प्राणान् धनार्थं हि महामते। प्रविशन्ति नरा वीराः समुद्रमटवीं तथा ॥
कृषिगोरक्ष्यमित्येके प्रतिपद्यन्ति मानवाः। पुरुषाः प्रेष्यतामेके निर्गच्छन्ति धनार्थिनः ॥[364]

5 motivations: Charity is given ...

धर्मादर्थाद्भयात्कामात्कारुण्यादिति ।[365]

3 kinds of charity:

अभिगम्योत्तमं दानम् आहूतं चैव मध्यमम्। अधमं वाचमानं स्यात् सेवादानं च निष्फलम् ॥[366]
परस्परस्य दानानि लोकयात्रा न धर्मतः ।[367]
शतेषु जायते शूरः सहस्रेषु च पण्डितः। वक्ता शतसहस्रेषु दाता भवति वा न वा ॥
न रणे विजयाच्छूरोऽध्ययनान्न च पण्डितः। न वक्ता वाक्पटुत्वेन न दाता चार्थदानतः ॥
इन्द्रियाणां जये शूरो धर्मं चरति पण्डितः। हितप्रियोक्तिभिर्वक्ता दाता सम्मानदानतः ॥[368]

According to ability:

एकां गां दशगुर्दद्याद् दश दद्याच्च गोशती। शतं सहस्रगुर्दद्यात् सर्वे तुल्यफला हि ते ॥[369]

To whom:

वृथा वृष्टिः समुद्रेषु वृथा तृप्तेषु भोजनम्। वृथा दानं धनाढ्येषु वृथा दीपो दिवापि च ॥[370]
न तेभ्योऽपि धनं देयं शक्ये सति कथञ्चन। पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत् ॥[371]

A क्षत्रिय does not accept दान, while a ब्राह्मण should accept (and quickly distribute), but never ask for it:

क्षत्रियोऽहं न जानामि देहीति वचनं क्वचित्। प्रयच्छ युद्धमित्येवं-वादिनः स्मो द्विजोत्तम ॥[372]
ब्राह्मणोऽनर्थनाधृतिः ।[373]

न तु पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः। एतस्मात्कारणाद्यज्ञैर् यजेद्राजाप्तदक्षिणैः ॥[374]
य उद्यतमनादृत्य कीनाशमभियाचते। क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः ॥[375]
दान can be classified according to importance:
(**1**) Protection (fearlessness)
हिरण्यदानैर्गोदानैर् भूमिदानैश्च सर्वशः। मांसस्याभक्षणे धर्मो विशिष्ट इति नः श्रुतिः ॥[376]
अभयस्य हि यो दाता तस्यैव सुमहत्फलम्। न हि प्राणसमं दानं त्रिषु लोकेषु विद्यते ॥[377]
(**2**) Livelihood (land, gold, kine and education)
भूमिर्भूतिर्महादेवी दातारं कुरुते प्रियम्। मामेवादत्त मां दत्त मां दत्त्वा मामवाप्स्यथ ॥[378]
यथाप्सु पतितः सद्यस् तैलबिन्दुः प्रसर्पति। एवं भूमिकृतं दानं शस्ये शस्ये प्ररोहति ॥[379]
सर्वान्कामान्प्रयच्छन्ति ये प्रयच्छन्ति काञ्चनम्।[380]

अग्नेरपत्यं प्रथमं सुवर्णो भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च महीं च दद्यात् ॥[381]

येन जीवति तद् दत्त्वा फलस्यान्तो न विद्यते।[382]
यो ब्रूयाच्चापि शिष्याय धर्म्यां ब्राह्मीं सरस्वतीम्। पृथिवीगोप्रदानाभ्यां तुल्यं स फलमश्नुते ॥[383]
एकमप्यक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत्। पृथिव्यां नास्ति तद् द्रव्यं यद्दत्त्वा सोऽनृणी भवेत् ॥[384]
(**3**) Help (food, water, ghee, trees, etc.)
अन्नेन सदृशं दानं न भूतं न भविष्यति।[385]
औषधं पथ्यमाहारं स्नेहाभ्यङ्गं प्रतिश्रयम्। यः प्रयच्छति रोगिभ्यः सर्वव्याधिविवर्जितः ॥
दानान्येतानि देयानि ह्यन्यानि च विशेषतः। दीनान्धकृपणादिभ्यः श्रेयस्कामेन धीमता ॥[386]
पानीयं परमं दानं दानानां मनुरब्रवीत्। तस्मात्कूपांश्च वापीश्च तडागानि च खानयेत् ॥[387]
तस्य पुत्रा भवन्त्येते पादपा नात्र संशयः। पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान्।
वृक्षदं पुत्रवद् वृक्षास् तारयन्ति परत्र तु ॥[388]
पुन्नाम्नो नरकाद्यस्मात् त्रायते पितरं सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयम्भुवा ॥[389]

## 64. Adharma

अज्ञानेनावृतो लोको मात्सर्यान्न प्रकाशते। लोभात्त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति ॥[390]
एकस्य कर्म संवीक्ष्य करोत्यन्योऽपि गर्हितम्। गतानुगतिको लोको न लोकः पारमार्थिकः ॥[391]
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं कर्म मानसम् ॥
पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः। असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥
अदत्तानामुपादानं हिंसा चैवाविधानतः। परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥[392]

| | (1) | (2) | (3) | (4) |
|---|---|---|---|---|
| धर्म | सत्य | शौच, दम | दया, दान | तपः, विद्या |
| अधर्म | द्यूत/अक्ष | सङ्ग/स्त्रिय | सूना/मृगया, स्मय | मद/पान |
| because of | | काम | क्रोध | लोभ |

गृहासक्तस्य नो विद्या नो दया मांसभोजिनः। द्रव्यलुब्धस्य नो सत्यं स्त्रैणस्य न पवित्रता ॥[393]
तपः शौचं दया सत्यम् इति पादाः कृते कृताः। अधर्मांशैस्त्रयो भग्नाः स्मयसङ्गमदैस्तव ॥[394]
अभ्यर्थितस्तदा तस्मै स्थानानि कलये ददौ। द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ॥
पुनश्च याचमानाय जातरूपमदात्प्रभुः। ततोऽनृतं मदं कामं रजो वैरं च पञ्चमम् ॥[395]
पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्। एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥[396]
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं महत्। तस्माद् द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥[397]
वार्द्धुषिं भ्रूणहत्यां च तुलया समतोलयत्। अतिष्ठद् भ्रूणहा कोटयां वार्द्धुषिर्न्यक्पपात ह ॥
द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं स्मृतम्। मासस्य वृद्धिं गृह्णीयाद् वर्णानामनुपूर्वशः ॥[398]

Conclusions:

कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्। कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम् ॥[399]
धनेनाधर्मलब्धेन यच्छिद्रमपिधीयते। असंवृतं तद्भवति ततोऽन्यदवदीर्यते ॥[400]
वर्धत्यधर्मेण नरस् ततो भद्राणि पश्यति। ततः सपत्नान् जयति समूलस्तु विनश्यति ॥[401]
सर्वतः शङ्कते स्तेनो मृगो ग्राममिवेयिवान्। बहुधाचरितं पापम् अन्यत्रैवानुपश्यति ॥[402]
समानकर्माचरणं पतितानां न पातकम् ।[403]
न मांसभक्षणे दोषो न मद्ये न च मैथुने। प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥[404]

## 65. Karma

कर्म-वाद (the theory of reaction of work, or responsibility):

मानुषेषु महाराजन् धर्माधर्मौ प्रवर्ततः। न तथान्येषु भूतेषु मनुष्यरहितेष्विह ॥[405]
यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति ॥[406]
बालो युवा च वृद्धश्च यत्करोति शुभाशुभम्। तस्यां तस्यामवस्थायां तत्फलं प्रतिपद्यते ॥[407]
रोगशोकपरीताप-बन्धनव्यसनानि च। आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ॥[408]

Witnesses:

ज्ञानपूर्वकृतं पापं छादयत्यबहुश्रुतः। नैनं मनुष्याः पश्यन्ति पश्यन्त्येव दिवौकसः ॥[409]
द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः। रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ॥[410]
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्। तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥[411]

"The law of Karma postulates that in this world there are no rewards or punishments; it is simply a case of inevitable consequences. As you sow, so shall you reap." (Nanabhoy /Nani Ardeshir Palkhivala; Indian lawyer and Ambassador to the USA, 1920-2002)

Own and shared कर्म /responsibility:

एकः प्रजायते जन्तुर् एक एव प्रलीयते। एको ऽनुभुङ्क्ते सुकृतम् एक एव च दुष्कृतम्॥[412]
स्वयं कर्म करोत्यात्मा स्वयं तत्फलमश्नुते। स्वयं भ्रमति संसारे स्वयं तस्माद्विमुच्यते॥[413]
आरोप्यते शिला शैले यत्नेन महता यथा। निपात्यते क्षणेनाधस् तथात्मा गुणदोषयोः॥[414]
यात्यधोऽधः व्रजत्युच्चैर् नरः स्वैरेव कर्मभिः। कूपस्य खनिता यद्वत् प्राकारस्येव कारकः॥[415]
अनिष्टादिष्टलाभे ऽपि न गतिर्जायते शुभा। यत्रास्ते विषसंसर्गो ऽमृतं तदपि मृत्यवे॥[416]
पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन्। सर्वदानाधिकं यस्मात् प्रजानां परिपालनम्॥
अरक्ष्यमाणाः कुर्वन्ति यत्किञ्चित्किल्बिषं प्रजाः। तस्मात्तु नृपतेरर्धं यस्माद् गृह्णात्यसौ करान्॥[417]
अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी। गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम्॥[418]
पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत्।[419]
यतये काञ्चनं दत्त्वा ताम्बुलं ब्रह्मचारिणे। चोरेभ्यो ऽप्यभयं दत्त्वा दातापि नरकं व्रजेत्॥[420]

Provision in कलि-युग:

धर्मकार्यं यतन् शक्त्या नो चेत्प्राप्नोति मानवः। प्राप्तो भवति तत्पुण्यम् अत्र मे नास्ति संशयः॥
मनसा चिन्तयन्पापं कर्मणा नातिरोचयन्। न प्राप्नोति फलं तस्येत्येवं धर्मविदो विदुः॥[421]
नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक्। कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत्॥[422]

"I am no Hindu, but I hold the doctrine of the Hindus concerning a future state to be incomparably more rational, more pious, and more likely to deter men from vice, than the horrid opinions, inculcated on punishments without end." (Sir William Jones, British judge of the Supreme Court at Calcutta, 1746-1794)

## 66. Daiva

Two stages of कर्म:

**1.** अ-प्रारब्ध-फल ('whose result has not yet come'), or आगामि (which is 'coming' later): Sometimes subdivided into कूट ('heap', subtle total stock), बीज (seed), and फल-उन्मुख ('awaiting the fruit', ripening).

**2.** प्रारब्ध-फल ('whose result has come'), that which has fructified in the form of our present body.

कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये। स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः॥[423]

The effects of कर्म are जन्म/जाति (good or bad birth), आयुः (lifespan), भोग (सुख from सुकृति and दुःख/क्लेश from पाप), ऐश्वर्य (lordship), श्रुति/विद्या (education), and श्री (beauty).

आयुः कर्म च वित्तं च विद्या निधनमेव च। पञ्चैतानि हि सृज्यन्ते गर्भस्थस्यैव देहिनः॥[424]

दैव, destiny:

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्। मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने॥[425]
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि। कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति॥[426]

योऽधिकाद्योजनशतात् पश्यतीहामिषं खगः। स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥[427]

अरक्षितं तिष्ठति देवरक्षितं सुरक्षितं देवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति ॥[428]

छित्त्वा पाशमपास्य कूटरचनां भङ्क्त्वा बलाद्वागुरां
पर्यन्ताग्निशिखाकलापजटिलान् निर्गत्य दूरं वनात्।
व्याधानां शरगोचरादपि जवेनोत्पत्य धावन्मृगः
कूपान्तःपतितः करोतु विधुरे किं वा विधौ पौरुषम् ॥[429]

दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु। जीवस्य न व्यवच्छेदः स्याच्चेत् तत्तत्प्रतिक्रिया ॥
यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन्। तं स्कन्धेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥[430]

But, दैव itself is the result of previous activities:

दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता। तत्र दैवमभिव्यक्तं पौरुषं पौर्वदेहिकम् ॥[431]

## 67. Kama

न पश्यति च जन्मान्धः कामान्धो नैव पश्यति। मदोन्मत्ता न पश्यन्ति अर्थी दोषं न पश्यति ॥[432]

"After reading and considering the works of Babhravya and other ancient authors, and thinking over the meaning of the rules given by them, this treatise (Kāma-Sūtra) was composed, according to the precepts of the sacred law, for the benefit of the world, by Vatsyayana, while leading the life of a religious student at Benares, and wholly engaged in the contemplation of the Deity. This work is not to be used merely as an instrument for satisfying our desires. A person acquainted with the true principles of this science, who preserves his Dharma-Artha-Kāma, and who has regard to the customs of the people, is sure to obtain the mastery over his senses. In short, an intelligent and knowing person attending to Dharma-Artha-Kāma, without becoming the slave of his passions, will obtain success in everything that he may do." (Vatsyayana; Indian philosopher, 2nd century)

The root of कर्म is काम/desire:

"काम, क्रोध and लोभ – this threefold gate to hell is the destruction of awareness of the self. Therefore, this triple one should give up." (भगवद्गीता 16.21)

क्षमया क्रोधमुच्छिन्द्यात् कामं सङ्कल्पवर्जनात्। सत्त्वसंसेवनाद्धीरो निद्रां च च्छेत्तुमर्हति ॥[433]
एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु। पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव ॥[434]
यद्यदेव हि वाञ्छेत ततो वाञ्छा प्रवर्तते। प्राप्त एवार्थतः सोऽर्थो यतो वाञ्छा निवर्तते ॥[435]

And the root of काम is ignorance of the soul:

उपद्रवांस्तथा रोगान् हितजीर्णमिताशनात्। लोभं मोहं च सन्तोषाद् विषयांस्तत्त्वदर्शनात् ॥
उत्थानेन जयेत्तन्द्रीं वितर्कं निश्चयाज्जयेत्। मौनेन बहुभाष्यं च शौर्येण च भयं त्यजेत् ॥

यच्छेद् वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा। ज्ञानमात्मावबोधेन यच्छेदात्मानमात्मना ॥[436]

## 68. Tapa

The following chapters cover topics concerning inner purification, like तपः, प्रायश्चित्त, पञ्च-यज्ञ, क्षमा and punishment.

व्रतं हि कर्तृसन्तापात् तप इत्यभिधीयते।[437]

सर्वमेतत्तपोमूलं कवयः परिचक्षते। न ह्यतप्ततपा मूढः क्रियाफलमवाप्नुते ॥[438]

ईहमानः समारम्भान् यदि नासादयेद्धनम्। उग्रं तपः समारोहेन् न ह्यनुप्तं प्ररोहति ॥[439]

कालेन स्नानशौचाभ्यां संस्कारैस्तपसेज्यया। शुध्यन्ति दानैः सन्तुष्ट्या द्रव्याण्यात्मात्मविद्यया॥[440]

कालोऽग्निः कर्म मृद्वायुर् मनो ज्ञानं तपो जलम्। पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः॥[441]

एकाकिना तपो द्वाभ्यां पठनं गायनं त्रिभिः। चतुर्भिर्गमनं क्षेत्रं पञ्चभिर्बहुभी रणः ॥[442]

As atonement:

शरीरपातनाच्चैव तपसाध्ययनेन च। मुच्यते पापकृत्पापाद् दानाच्चापि प्रमुच्यते ॥[443]

शक्यते विधिना पापं यथोक्तेन व्यपोहितुम्। आस्तिके श्रद्दधाने च विधिरेष विधीयते ॥[444]

तपसा कर्मणा चैव प्रदानेन च भारत। पुनाति पापं पुरुषः पुनश्चेन्न प्रवर्तते ॥[445]

द्वितीयमपराधं न कस्यचित्क्षमेत्।[446]

Methods:

(1) cutting hair

यत्किञ्चित्क्रियते पापं सर्वं केशेषु तिष्ठति। सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलिद्वयम् ॥[447]

(2) ब्रह्म-कूर्च ('spiritual bundle' of कुश grass), a process of taking पञ्च-गव्य

(3) उपवास, also called कृच्छ्र ('hardship')

समुन्नमग्रतो वस्त्रं पश्चाच्छुध्यति कर्मणा। उपवासैः प्रतप्तानां दीर्घं सुखमनन्तकम् ॥[448]

"Eating in the evening and in the morning is prescribed in the वेद for men. If food is not taken in between sunrise and sunset one is also as if fasting."[449] ... called नक्त-व्रत ('night penance', eating only at night) in अत्रि-स्मृति 131.

"For three days one eats in the evening, three days in the early morning, three days only what is unsolicited, and the last three days one should fast – this is described as प्राजापत्य rule."[450]

"During कृष्ण-पक्ष one should reduce the food every day by one morsel, and during शुक्ल-पक्ष one should increase it. On अमावास्या/अमावस्या one should not eat. This is the चान्द्रायण rule."[451] Thus one starts and ends with fourteen morsels. According to other sources the व्रत starts with शुक्ल-पक्ष, first increasing the food.

But:

मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः। आत्मतन्त्रोपघातस्तु न तपस्तत्सतां मतम् ॥

त्यागश्च सन्नतिश्चैव शिष्यते तप उत्तमम् । सदोपवासी च भवेद् ब्रह्मचारी सदा भवेत् ॥[452]
अहिंसा सत्यवचनम् आनृशंस्यं दमो घृणा । एतत्तपो विदुर्धीरा न शरीरस्य शोषणम् ॥[453]
क्षमा (forgiveness):
अपमानात्तपोवृद्धिः सम्मानात्तपसः क्षयः ।[454]
आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् । वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥[455]
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते । यदेनं क्षमया युक्तम् अशक्तं मन्यते जनः ॥
द्वाविमौ पुरुषौ राजन् स्वर्गस्योपरि तिष्ठतः । प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥[456]
When राम was forced into exile He said to लक्ष्मण:
बुद्धिः प्रणीता येनेयं मनश्च सुसमाहितम् । तं तु नार्हामि सङ्क्लेष्टुं प्रव्रजिष्यामि मा चिरम् ॥[457]
परवाच्येषु निपुणः सर्वो भवति सर्वदा । आत्मवाच्यं न जानीते जानन्नपि न मुह्यति ॥[458]

